# দেবী মাহাত্ম্যম্ বা দুর্গাসপ্তশতী

{॥ দেবী মাহাত্ম্যম্ বা দুর্গাসপ্তশতী ॥}

॥ দেবী মাহাত্ম্যম্ ॥

॥ শ্রী ॥

॥ শ্রীচণ্ডিকাধ্যানম্ ॥

ওঁ বন্ধূককুসুমাভাসাং পঞ্চমুণ্ডাধিবাসিনীম্ ।

স্ফুরচ্চন্দ্রকলারত্নমুকুটাং মুণ্ডমালিনীম্ ॥

ত্রিনেত্রাং রক্তবসনাং পীনোন্নতঘটস্তনীম্ ।

পুস্তকং চাক্ষমালাং চ বরং চাভযকং ক্রমাত্ ॥

দধতীং সংস্মরেন্নিত্যমুত্তরাম্নাযমানিতাম্ ।

অথবা

যা চণ্ডী মধুকৈটভাদিদৈত্যদলনী যা মাহিষোন্মূলিনী

যা ধূম্রেক্ষণচণ্ডমুণ্ডমথনী যা রক্তবীজাশনী ।

শক্তিঃ শুম্ভনিশুম্ভদৈত্যদলনী যা সিদ্ধিদাত্রী পরা

সা দেবী নবকোটিমূর্তিসহিতা মাং পাতু বিশ্বেশ্বরী ॥

॥ অথ অর্গলাস্তোত্রম্ ॥

ওঁ অস্য শ্রীঅর্গলাস্তোত্রমন্ত্রস্য বিষ্ণুরৃষিঃ,

অনুষ্টুপ্ ছন্দঃ, শ্রীমহালক্ষ্মীর্দেবতা,

শ্রীজগদম্বাপ্রীতয়ে সপ্তশতিপাঠাঙ্গত্বেন জপে বিনিয়োগঃ ।

ওঁ নমশ্চণ্ডিকায়ৈ ।

মার্কণ্ডেয় উবাচ ।

ওঁ জয় ত্বং দেবি চামুণ্ডে জয় ভূতাপহারিণি ।

জয় সর্বগতে দেবি কালরাত্রি নমোঽস্তু তে ॥ ১॥

জয়ন্তী মঙ্গলা কালী ভদ্রকালী কপালিনী ।

দুর্গা শিবা ক্ষমা ধাত্রী স্বাহা স্বধা নমোঽস্তু তে ॥ ২॥

মধুকৈটভবিধ্বংসি বিধাতৃবরদে নমঃ ।

রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥ ৩॥

মহিষাসুরনির্নাশি ভক্তানাং সুখদে নমঃ ।

রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥ ৪॥

ধূম্রনেত্রবধে দেবি ধর্মকামার্থদায়িনি ।

রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥ ৫॥

রক্তবীজবধে দেবি চণ্ডমুণ্ডবিনাশিনি ।

রূপং দেহি জয়ং দেহি যশো দেহি দ্বিষো জহি ॥ ৬॥

নিশুম্ভশুম্ভনির্নাশি ত্রৈলোক্যশুভদে নমঃ ।

রূপং দেহি জযং দেহি যশো দেহি দ্বিষো জহি ॥ ৭॥

বন্দিতাঙ্ঘ্রিযুগে দেবি সর্বসৌভাগ্যদাযিনি ।

রূপং দেহি জযং দেহি যশো দেহি দ্বিষো জহি ॥ ৮॥

অচিন্ত্যরূপচরিতে সর্বশত্রুবিনাশিনি ।

রূপং দেহি জযং দেহি যশো দেহি দ্বিষো জহি ॥ ৯॥

নতেভ্যঃ সর্বদা ভক্ত্যা চাপর্ণে দুরিতাপহে ।

রূপং দেহি জযং দেহি যশো দেহি দ্বিষো জহি ॥ ১০॥

স্তুবদ্ভ্যো ভক্তিপূর্বং ত্বাং চণ্ডিকে ব্যাধিনাশিনি ।

রূপং দেহি জযং দেহি যশো দেহি দ্বিষো জহি ॥ ১১॥

চণ্ডিকে সততং যুদ্ধে জযন্তি পাপনাশিনি ।

রূপং দেহি জযং দেহি যশো দেহি দ্বিষো জহি ॥ ১২॥

দেহি সৌভাগ্যমারোগ্যং দেহি দেবি পরং সুখম্ ।

রূপং দেহি জযং দেহি যশো দেহি দ্বিষো জহি ॥ ১৩॥

বিধেহি দেবি কল্যাণং বিধেহি বিপুলাং শ্রিযম্ ।

রূপং দেহি জযং দেহি যশো দেহি দ্বিষো জহি ॥ ১৪॥

বিধেহি দ্বিষতাং নাশং বিধেহি বলমুচ্চকৈঃ ।

রূপং দেহি জযং দেহি যশো দেহি দ্বিষো জহি ॥ ১৫॥

সুরাসুরশিরোরত্ননিঘৃষ্টচরণেঽম্বিকে ।

রূপং দেহি জযং দেহি যশো দেহি দ্বিষো জহি ॥ ১৬॥

বিদ্যাবন্তং যশস্বন্তং লক্ষ্মীবন্তঞ্চ মাং কুরু ।

রূপং দেহি জযং দেহি যশো দেহি দ্বিষো জহি ॥ ১৭॥

দেবি প্রচণ্ডদোর্দণ্ডদৈত্যদর্পনিষূদিনি ।

রূপং দেহি জযং দেহি যশো দেহি দ্বিষো জহি ॥ ১৮॥

প্রচণ্ডদৈত্যদর্পঘ্নে চণ্ডিকে প্রণতায মে ।

রূপং দেহি জযং দেহি যশো দেহি দ্বিষো জহি ॥ ১৯॥

চতুর্ভুজে চতুর্বক্ত্রসংস্তুতে পরমেশ্বরি ।

রূপং দেহি জযং দেহি যশো দেহি দ্বিষো জহি ॥ ২০॥

কৃষ্ণেন সংস্তুতে দেবি শশ্বদ্ভক্ত্যা সদাম্বিকে ।

রূপং দেহি জযং দেহি যশো দেহি দ্বিষো জহি ॥ ২১॥

হিমাচলসুতানাথসংস্তুতে পরমেশ্বরি ।
রূপং দেহি জযং দেহি যশো দেহি দ্বিষো জহি ॥ ২২॥

ইন্দ্রাণীপতিসদ্ভাবপূজিতে পরমেশ্বরি ।
রূপং দেহি জযং দেহি যশো দেহি দ্বিষো জহি ॥ ২৩॥

দেবি ভক্তজনোদ্দামদত্তানন্দোদযেঽম্বিকে ।
রূপং দেহি জযং দেহি যশো দেহি দ্বিষো জহি ॥ ২৪॥

ভার্যাং মনোরমাং দেহি মনোবৃত্তানুসারিণীম্ ।
রূপং দেহি জযং দেহি যশো দেহি দ্বিষো জহি ॥ ২৫॥

তারিণি দুর্গসংসারসাগরস্যাচলোদ্ভবে ।
রূপং দেহি জযং দেহি যশো দেহি দ্বিষো জহি ॥ ২৬॥

ইদং স্তোত্রং পঠিত্বা তু মহাস্তোত্রং পঠেন্নরঃ ।
সপ্তশতীং সমারাধ্য বরমাপ্নোতি দুর্লভম্ ॥ ২৭॥

॥ ইতি শ্রীমার্কণ্ডেযপুরাণে অর্গলাস্তোত্রং সমাপ্তম্ ॥

॥ অথ কীলকস্তোত্রম্ ॥

ওঁ অস্য শ্রীকীলকমন্ত্রস্য শিবঋষিঃ, অনুষ্টুপ্ ছন্দঃ,

শ্রীমহাসরস্বতী দেবতা, শ্রীজগদম্বাপ্রীত্যর্থং

সপ্তশতীপাঠাঙ্গত্বেন জপে বিনিয়োগঃ ।

ওঁ নমশ্চণ্ডিকায়ৈ ।

মার্কণ্ডেয় উবাচ ।

ওঁ বিশুদ্ধজ্ঞানদেহায় ত্রিবেদীদিব্যচক্ষুষে ।

শ্রেয়ঃপ্রাপ্তিনিমিত্তায় নমঃ সোমার্ধধারিণে ॥ ১॥

সর্বমেতদ্বিজানীয়ান্মন্ত্রাণামপি কীলকম্ ।

সোঽপি ক্ষেমমবাপ্নোতি সততং জপ্যতৎপরঃ ॥ ২॥

সিদ্ধ্যন্ত্যুচ্চাটনাদীনি কর্মাণি সকলান্যপি ।

এতেন স্তুবতাং দেবীং স্তোত্রবৃন্দেন ভক্তিতঃ ॥ ৩॥

ন মন্ত্রো নৌষধং তস্য ন কিঞ্চিদপি বিদ্যতে ।

বিনা জপ্যেন সিদ্ধ্যেত্তু সর্বমুচ্চাটনাদিকম্ ॥ ৪॥

সমগ্রাণ্যপি সেৎস্যন্তি লোকশঙ্কামিমাং হরঃ ।

কৃত্বা নিমন্ত্রয়ামাস সর্বমেবমিদং শুভম্ ॥ ৫॥

স্তোত্রং বৈ চণ্ডিকায়াস্তু তচ্চ গুহ্যং চকার সঃ ।

সমাপ্নোতি স পুণ্যেন তাং যথাবন্নিমন্ত্রণাম্ ॥ ৬॥

সোঽপি ক্ষেমমবাপ্নোতি সর্বমেব ন সংশয়ঃ ।

কৃষ্ণায়াং বা চতুর্দশ্যামষ্টম্যাং বা সমাহিতঃ ॥ ৭॥

দদাতি প্রতিগৃহ্ণাতি নান্যথৈষা প্রসীদতি ।

ইত্থং রূপেণ কীলেন মহাদেবেন কীলিতম্ ॥ ৮॥

যো নিষ্কীলাং বিধায়ৈনাং চণ্ডীং জপতি নিত্যশঃ ।

স সিদ্ধঃ স গণঃ সোঽথ গন্ধর্বো জায়তে ধ্রুবম্ ॥ ৯॥

ন চৈবাপাটবং তস্য ভয়ং ক্বাপি ন জায়তে ।

নাপমৃত্যুবশং যাতি মৃতে চ মোক্ষমাপ্নুয়াত্ ॥ ১০॥

জ্ঞাত্বা প্রারভ্য কুর্বীত হ্যকুর্বাণো বিনশ্যতি ।

ততো জ্ঞাত্বৈব সম্পূর্ণমিদং প্রারভ্যতে বুধৈঃ ॥ ১১॥

সৌভাগ্যাদি চ যৎকিঞ্চিদ্ দৃশ্যতে ললনাজনে ।

তৎসর্বং তৎপ্রসাদেন তেন জপ্যমিদং শুভম্ ॥ ১২॥

শনৈস্তু জপ্যমানেঽস্মিন্ স্তোত্রে সম্পত্তিরুচ্চকৈঃ ।

ভবত্যেব সমগ্রাপি ততঃ প্রারভ্যমেব তত্ ॥ ১৩॥

ঐশ্বর্যং তৎপ্রসাদেন সৌভাগ্যারোগ্যমেব চ ।

শত্রুহানিঃ পরো মোক্ষঃ স্তূয়তে সা ন কিং জনৈঃ ॥ ১৪॥

চণ্ডিকাং হৃদয়েনাপি যঃ স্মরেত্ সততং নরঃ ।
হৃদ্যং কামমবাপ্নোতি হৃদি দেবী সদা বসেত্ ॥ ১৫॥

অগ্রতোঽমুং মহাদেবকৃতং কীলকবারণম্ ।
নিষ্কীলঞ্চ তথা কৃত্বা পঠিতব্যং সমাহিতৈঃ ॥ ১৬॥

॥ ইতি শ্রীভগবত্যাঃ কীলকস্তোত্রং সমাপ্তম্ ॥

॥ অথ দেবী কবচম্ ॥

অস্য শ্রীচণ্ডীকবচস্য ব্রহ্মা ঋষিঃ , অনুষ্টুপ্ ছন্দঃ ,
চামুণ্ডা দেবতা , অঙ্গন্যাসোক্তমাতরো বীজম্ ,
দিগ্বন্ধদেবতাস্তত্ত্বম্ , শ্রীজগদম্বাপ্রীত্যর্থে জপে বিনিয়োগঃ ।
ওঁ নমশ্চণ্ডিকায়ৈ ।
মার্কণ্ডেয় উবাচ ।
ওঁ যদ্গুহ্যং পরমং লোকে সর্বরক্ষাকরং নৃণাম্ ।
যন্ন কস্যচিদাখ্যাতং তন্মে ব্রূহি পিতামহ ॥ ১॥

ব্রহ্মোবাচ ।
অস্তি গুহ্যতমং বিপ্র সর্বভূতোপকারকম্ ।
দেব্যাস্তু কবচং পুণ্যং তচ্ছৃণুষ্ব মহামুনে ॥ ২॥

প্রথমং শৈলপুত্রীতি দ্বিতীযং ব্রহ্মচারিণী ।

তৃতীযং চন্দ্রঘণ্টেতি কূষ্মাণ্ডেতি চতুর্থকম্ ॥ ৩॥

পঞ্চমং স্কন্দমাতেতি ষষ্ঠং কাত্যাযনী তথা ।

সপ্তমং কালরাত্রিশ্চ মহাগৌরীতি চাষ্টমম্ ॥ ৪ ॥

নবমং সিদ্ধিদাত্রী চ নবদুর্গাঃ প্রকীর্তিতাঃ ।

উক্তান্যেতানি নামানি ব্রহ্মণৈব মহাত্মনা ॥ ৫॥

অগ্নিনা দহ্যমানাস্তু শত্রুমধ্যগতা রণে ।

বিষমে দুর্গমে চৈব ভযার্তাঃ শরণং গতাঃ ॥ ৬।

ন তেষাং জাযতে কিঞ্চিদশুভং রণসঙ্কটে ।

আপদং ন চ পশ্যন্তি শোকদুঃখভযঙ্করীম্ ॥ ৭॥

যৈস্তু ভক্ত্যা স্মৃতা নিত্যং তেষাং বৃদ্ধিঃ প্রজাযতে ।

যে ত্বাং স্মরন্তি দেবেশি রক্ষসি তান্ন সংশযঃ ॥ ৮॥

প্রেতসংস্থা তু চামুণ্ডা বারাহী মহিষাসনা ।

ঐন্দ্রী গজসমারূঢা বৈষ্ণবী গরুডাসনা ॥ ৯॥

নারসিংহী মহাবীর্যা শিবদূতী মহাবলা ।

***Stotram Digitalized By [Sanskritdocuments.org](http://Sanskritdocuments.org)***

মাহেশ্বরী বৃষারূঢা কৌমারী শিখিবাহনা ॥ ১০॥

লক্ষ্মীঃ পদ্মাসনা দেবী পদ্মহস্তা হরিপ্রিযা ।

শ্বেতরূপধরা দেবী ঈশ্বরী বৃষবাহনা ॥ ১১॥

ব্রাহ্মী হংসসমারূঢা সর্বাভরণভূষিতা ।

ইত্যেতা মাতরঃ সর্বাঃ সর্বযোগসমন্বিতাঃ ॥ ১২॥

নানাভরণশোভাঢ্যা নানারত্নোপশোভিতাঃ ।

শ্রেষ্ঠৈশ্চ মৌক্তিকৈঃ সর্বা দিব্যহারপ্রলম্বিভিঃ ॥ ১৩॥

ইন্দ্রনীলৈর্মহানীলৈঃ পদ্মরাগৈঃ সুশোভনৈঃ ।

দৃশ্যন্তে রথমারূঢা দেব্যঃ ক্রোধসমাকুলাঃ ॥ ১৪॥

শঙ্খং চক্রং গদাং শক্তিং হলং চ মুসলাযুধম্ ।

খেটকং তোমরং চৈব পরশুং পাশমেব চ ॥ ১৫॥

কুন্তাযুধং ত্রিশূলং চ শার্ঙ্গমাযুধমুত্তমম্ ।

দৈত্যানাং দেহনাশায ভক্তানামভযায চ ॥ ১৬॥

ধারযন্ত্যাযুধানীত্থং দেবানাং চ হিতায বৈ ।

নমস্তেঽস্তু মহারৌদ্রে মহাঘোরপরাক্রমে ॥ ১৭॥

মহাবলে মহোৎসাহে মহাভয়বিনাশিনি ।

ত্রাহি মাং দেবি দুষ্প্রেক্ষ্যে শত্রূণাং ভয়বর্ধিনি ॥ ১৮॥

প্রাচ্যাং রক্ষতু মামৈন্দ্রী আগ্নেয্যামগ্নিদেবতা ।

দক্ষিণেঽবতু বারাহী নৈরৃত্যাং খড্গধারিণী ॥ ১৯॥

প্রতীচ্যাং বারুণী রক্ষেদ্বায়ব্যাং মৃগবাহিনী ।

উদীচ্যাং পাতু কৌবেরী ঈশান্যাং শূলধারিণী ॥ ২০॥

ঊর্ধ্বং ব্রহ্মাণী মে রক্ষেদধস্তাদ্বৈষ্ণবী তথা ।

এবং দশ দিশো রক্ষেচ্চামুণ্ডা শববাহনা ॥ ২১॥

জয়া মামগ্রতঃ পাতু বিজয়া পাতু পৃষ্ঠতঃ ।

অজিতা বামপার্শ্বে তু দক্ষিণে চাপরাজিতা ॥ ২২॥

শিখাং মে দ্যোতিনী রক্ষেদুমা মূর্ধ্নি ব্যবস্থিতা ।

মালাধরী ললাটে চ ভ্রুবৌ রক্ষেদ্যশস্বিনী ॥ ২৩॥

নেত্রয়োশ্চিত্রনেত্রা চ যমঘণ্টা তু পার্শ্বকে ।

ত্রিনেত্রা চ ত্রিশূলেন ভ্রুবোর্মধ্যে চ চণ্ডিকা ॥ ২৪॥

শঙ্খিনী চক্ষুষোর্মধ্যে শ্রোত্রয়োর্দ্বারবাসিনী ।

কপোলৌ কালিকা রক্ষেত্ কর্ণমূলে তু শঙ্করী ॥ ২৫॥

নাসিকায়াং সুগন্ধা চ উত্তরোষ্ঠে চ চর্চিকা ।

অধরে চামৃতাবালা জিহ্বায়াং চ সরস্বতী ॥ ২৬॥

দন্তান্ রক্ষতু কৌমারী কণ্ঠদেশে তু চণ্ডিকা ।

ঘণ্টিকাং চিত্রঘণ্টা চ মহামায়া চ তালুকে ॥ ২৭॥

কামাক্ষী চিবুকং রক্ষেদ্বাচং মে সর্বমঙ্গলা ।

গ্রীবায়াং ভদ্রকালী চ পৃষ্ঠবংশে ধনুর্ধরী ॥ ২৮॥

নীলগ্রীবা বহিঃ কণ্ঠে নলিকাং নলকূবরী ।

স্কন্ধয়োঃ খড্গিনী রক্ষেদ্ বাহূ মে বজ্রধারিণী ॥ ২৯॥

হস্তয়োর্দণ্ডিনী রক্ষেদম্বিকা চাঙ্গুলীষু চ ।

নখাঞ্ছুলেশ্বরী রক্ষেত্ কুক্ষৌ রক্ষেন্নরেশ্বরী ॥ ৩০॥

স্তনৌ রক্ষেন্মহাদেবী মনঃশোকবিনাশিনী ।

হৃদয়ে ললিতা দেবী উদরে শূলধারিণী ॥ ৩১॥

নাভৌ চ কামিনী রক্ষেদ্ গুহ্যং গুহ্যেশ্বরী তথা ।

মেঢ্রং রক্ষতু দুর্গন্ধা পায়ুং মে গুহ্যবাহিনী ॥ ৩২॥

কট্যাং ভগবতী রক্ষেদূরূ মে মেঘবাহনা ।

জঙ্ঘে মহাবলা রক্ষেত্ জানূ মাধবনাযিকা ॥ ৩৩॥

গুল্ফযোর্নারসিংহী চ পাদপৃষ্ঠে তু কৌশিকী ।

পাদাঙ্গুলীঃ শ্রীধরী চ তলং পাতালবাসিনী ॥ ৩৪ ॥

নখান্ দংষ্ট্রকরালী চ কেশাংশ্চৈবোর্ধ্বকেশিনী ।

রোমকূপেষু কৌমারী ত্বচং যোগীশ্বরী তথা ॥ ৩৫॥

রক্তমজ্জাবসামাংসান্যস্থিমেদাংসি পার্বতী ।

অন্ত্রাণি কালরাত্রিশ্চ পিত্তং চ মুকুটেশ্বরী ॥ ৩৬॥

পদ্মাবতী পদ্মকোশে কফে চূডামণিস্তথা ।

জ্বালামুখী নখজ্বালামভেদ্যা সর্বসন্ধিষু ॥ ৩৭॥

শুক্রং ব্রহ্মাণী মে রক্ষেচ্ছাযাং ছত্রেশ্বরী তথা ।

অহঙ্কারং মনো বুদ্ধিং রক্ষেন্মে ধর্মধারিণী ॥ ৩৮॥

প্রাণাপানৌ তথা ব্যানমুদানং চ সমানকম্ ।

বজ্রহস্তা চ মে রক্ষেত্ প্রাণান্ কল্যাণশোভনা ॥ ৩৯॥

রসে রূপে চ গন্ধে চ শব্দে স্পর্শে চ যোগিনী ।

সত্ত্বং রজস্তমশ্চৈব রক্ষেন্নারায়ণী সদা ॥ ৪০॥

আয়ূ রক্ষতু বারাহী ধর্মং রক্ষতু পার্বতী ।

যশঃ কীর্তিং চ লক্ষ্মীং চ সদা রক্ষতু বৈষ্ণবী ॥ ৪১॥

গোত্রমিন্দ্রাণী মে রক্ষেত্ পশূন্ রক্ষেচ্চ চণ্ডিকা ।

পুত্রান্ রক্ষেন্মহালক্ষ্মীর্ভার্যাং রক্ষতু ভৈরবী ॥ ৪২॥

ধনেশ্বরী ধনং রক্ষেত্ কৌমারী কন্যকাং তথা ।

পন্থানং সুপথা রক্ষেন্মার্গং ক্ষেমঙ্করী তথা ॥ ৪৩॥

রাজদ্বারে মহালক্ষ্মীর্বিজয়া সতত স্থিতা ।

রক্ষাহীনং তু যত্ স্থানং বর্জিতং কবচেন তু ॥ ৪৪॥

তৎসর্বং রক্ষ মে দেবি জয়ন্তী পাপনাশিনী ।

সর্বরক্ষাকরং পুণ্যং কবচং সর্বদা জপেত্ ॥ ৪৫॥

ইদং রহস্যং বিপ্রর্ষে ভক্ত্যা তব ময়োদিতম্ ॥

পাদমেকং ন গচ্ছেত্ তু যদীচ্ছেচ্ছুভমাত্মনঃ ॥ ৪৬॥

কবচেনাবৃতো নিত্যং যত্র যত্রৈব গচ্ছতি ।

তত্র তত্রার্থলাভশ্চ বিজয়ঃ সার্বকালিকঃ ॥ ৪৭॥

যং যং চিন্তযতে কামং তং তং প্রাপ্নোতি নিশ্চিতম্ ।
পরমৈশ্বর্যমতুলং প্রাপ্স্যতে ভূতলে পুমান্ ॥ ৪৮॥

নির্ভযো জাযতে মর্ত্যঃ সঙ্গ্রামেষ্বপরাজিতঃ ।
ত্রৈলোক্যে তু ভবেৎপূজ্যঃ কবচেনাবৃতঃ পুমান্ ॥ ৪৯॥

ইদং তু দেব্যাঃ কবচং দেবানামপি দুর্লভম্ ।
যঃ পঠেৎপ্রযতো নিত্যং ত্রিসন্ধ্যং শ্রদ্ধযান্বিতঃ ॥ ৫০॥

দৈবীকলা ভবেত্তস্য ত্রৈলোক্যে চাপরাজিতঃ ।
জীবেদ্বর্ষশতং সাগ্রমপমৃত্যুবিবর্জিতঃ ॥ ৫১॥

নশ্যন্তি ব্যাধযঃ সর্বে লূতাবিস্ফোটকাদযঃ ।
স্থাবরং জঙ্গমং চৈব কৃত্রিমং চৈব যদ্বিষম্ ॥ ৫২॥

অভিচারাণি সর্বাণি মন্ত্রযন্ত্রাণি ভূতলে ।
ভূচরাঃ খেচরাশ্চৈব কুলজাশ্চৌপদেশিকাঃ ॥ ৫৩॥

সহজা কুলজা মালা ডাকিনী শাকিনী তথা ।
অন্তরিক্ষচরা ঘোরা ডাকিন্যশ্চ মহারবাঃ ॥ ৫৪॥

গ্রহভূতপিশাচাশ্চ যক্ষগন্ধর্বরাক্ষসাঃ ।

ব্রহ্মরাক্ষসবেতালাঃ কূষ্মাণ্ডা ভৈরবাদযঃ ॥ ৫৫॥

নশ্যন্তি দর্শনাত্তস্য কবচেনাবৃতো হি যঃ ।

মানোন্নতির্ভবেদ্রাজ্ঞস্তেজোবৃদ্ধিঃ পরা ভবেত্ ॥ ৫৬॥

যশোবৃদ্ধির্ভবেত্ পুংসাং কীর্তিবৃদ্ধিশ্চ জাযতে ।

তস্মাত্ জপেত্ সদা ভক্তঃ কবচং কামদং মুনে ॥ ৫৭॥

জপেত্ সপ্তশতীং চণ্ডীং কৃত্বা তু কবচং পুরা ।

নির্বিঘ্নেন ভবেত্ সিদ্ধিশ্চণ্ডীজপসমুদ্ভবা ॥ ৫৮॥

যাবদ্ভূমণ্ডলং ধত্তে সশৈলবনকাননম্ ।

তাবত্তিষ্ঠতি মেদিন্যাং সন্ততিঃ পুত্রপৌত্রিকী ॥ ৫৯॥

দেহান্তে পরমং স্থানং সুরৈরপি সুদুর্লভম্ ।

প্রাপ্নোতি পুরুষো নিত্যং মহামাযাপ্রসাদতঃ ॥ ৬০॥

তত্র গচ্ছতি গত্বাসৌ পুনশ্চাগমনং নহি ।

লভতে পরমং স্থানং শিবেন সমতাং ব্রজেত্ ॥ ৬১॥

॥ ইতি শ্রীমার্কণ্ডেযপুরাণে হরিহরব্রহ্মবিরচিতং

দেবীকবচং সমাপ্তম্ ॥

॥ দেবী মাহাত্ম্যম্ ॥

%

॥ শ্রীদুর্গায়ৈ নমঃ ॥

॥ অথ শ্রীদুর্গাসপ্তশতী ॥

॥ প্রথমোঽধ্যাযঃ ॥

বিনিযোগঃ

অস্য শ্রী প্রথমচরিত্রস্য । ব্রহ্মা ঋষিঃ ।

মহাকালী দেবতা । গাযত্রী ছন্দঃ । নন্দা শক্তিঃ ।

রক্তদন্তিকা বীজম্ । অগ্নিস্তত্ত্বম্ ।

ঋগ্বেদঃ স্বরূপম্ । শ্রীমহাকালীপ্রীত্যর্থে

প্রথমচরিত্রজপে

বিনিযোগঃ ।

। ধ্যানম্ ।

ওঁ খড্গং চক্রগদেষুচাপপরিঘাঞ্ছূলং ভুশুণ্ডীং শিরঃ

শঙ্খং সন্দধতীং করৈস্ত্রিনযনাং সর্বাঙ্গভূষাবৃতাম্ ।

নীলাশ্মদ্যুতিমাস্যপাদদশকাং সেবে মহাকালিকাং

যামস্তৌৎস্বপিতে হরৌ কমলজো হন্তুং মধুং কৌটভম্ ॥

ওঁ নমশ্চণ্ডিকাযৈ ॥

Stotram Digitalized By Sanskritdocuments.org

ওঁ ঐং মার্কণ্ডেয় উবাচ ॥ ১॥

সাবর্ণিঃ সূর্যতনযো যো মনুঃ কথ্যতেঽষ্টমঃ ।

নিশামায তদুৎপত্তিং বিস্তরাদ্গদতো মম ॥ ২॥

মহামাযানুভাবেন যথা মন্বন্তরাধিপঃ ।

স বভূব মহাভাগঃ সাবর্ণিস্তনযো রবেঃ ॥ ৩॥

স্বারোচিষেঽন্তরে পূর্বং চৈত্রবংশসমুদ্ভবঃ ।

সুরথো নাম রাজাভূৎসমস্তে ক্ষিতিমণ্ডলে ॥ ৪॥

তস্য পালযতঃ সম্যক্ প্রজাঃ পুত্রানিবৌরসান্ ।

বভূবুঃ শত্রবো ভূপাঃ কোলাবিধ্বংসিনস্তদা ॥ ৫॥

তস্য তৈরভবদ্ যুদ্ধমতিপ্রবলদণ্ডিনঃ ।

ন্যূনৈরপি স তৈর্যুদ্ধে কোলাবিধ্বংসিভির্জিতঃ ॥ ৬॥

ততঃ স্বপুরমাযাতো নিজদেশাধিপোঽভবত্ ।

আক্রান্তঃ স মহাভাগস্তৈস্তদা প্রবলারিভিঃ ॥ ৭॥

অমাত্যৈর্বলিভির্দুষ্টৈর্দুর্বলস্য দুরাত্মভিঃ ।

কোশো বলং চাপহৃতং তত্রাপি স্বপুরে ততঃ ॥ ৮॥

ততো মৃগযাব্যাজেন হৃতস্বাম্যঃ স ভূপতিঃ।
একাকী হযমারুহ্য জগাম গহনং বনম্ ॥ ৯॥

স তত্রাশ্রমমদ্রাক্ষীদ্দ্বিজবর্যস্য মেধসঃ।
প্রশান্তশ্বাপদাকীর্ণং মুনিশিষ্যোপশোভিতম্ ॥ ১০॥

তস্থৌ কঞ্চিৎস কালং চ মুনিনা তেন সৎকৃতঃ।
ইতশ্চেতশ্চ বিচরংস্তস্মিন্ মুনিবরাশ্রমে ॥ ১১॥

সোঽচিন্তযত্তদা তত্র মমত্বাকৃষ্টমানসঃ।
মৎপূর্বৈঃ পালিতং পূর্বং মযা হীনং পুরং হি তত্ ॥ ১২॥

মদ্ভৃত্যৈস্তৈরসদ্বৃত্তৈর্ধর্মতঃ পাল্যতে ন বা।
ন জানে স প্রধানো মে শূরো হস্তী সদামদঃ ॥ ১৩॥

মম বৈরিবশং যাতঃ কান্ ভোগানুপলপ্স্যতে।
যে মমানুগতা নিত্যং প্রসাদধনভোজনৈঃ ॥ ১৪॥

অনুবৃত্তিং ধ্রুবং তেঽদ্য কুর্বন্ত্যন্যমহীভৃতাম্।
অসম্যগ্ব্যযশীলৈস্তৈঃ কুর্বদ্ভিঃ সততং ব্যযম্ ॥ ১৫॥

সংচিতঃ সোঽতিদুঃখেন ক্ষযং কোশো গমিষ্যতি।

এতচ্চান্যচ্চ সততং চিন্তযামাস পার্থিবঃ ॥ ১৬॥

তত্র বিপ্রাশ্রমাভ্যাশে বৈশ্যমেকং দদর্শ সঃ ।

স পৃষ্টস্তেন কস্ত্বং ভো হেতুশ্চাগমনেঽত্র কঃ ॥ ১৭॥

সশোক ইব কস্মাত্ত্বং দুর্মনা ইব লক্ষ্যসে ।

ইত্যাকর্ণ্য বচস্তস্য ভূপতেঃ প্রণযোদিতম্ ॥ ১৮॥

প্রত্যুবাচ স তং বৈশ্যঃ প্রশ্রযাবনতো নৃপম্ ॥ ১৯॥

বৈশ্য উবাচ ॥ ২০॥

সমাধির্নাম বৈশ্যোঽহমুৎপন্নো ধনিনাং কুলে ॥ ২১॥

পুত্রদারৈর্নিরস্তশ্চ ধনলোভাদসাধুভিঃ ।

বিহীনশ্চ ধনৈর্দারৈঃ পুত্রৈরাদায মে ধনম্ ॥ ২২॥

বনমভ্যাগতো দুঃখী নিরস্তশ্চাপ্তবন্ধুভিঃ ।

সোঽহং ন বেদ্মি পুত্রাণাং কুশলাকুশলাত্মিকাম্ ॥ ২৩॥

প্রবৃত্তিং স্বজনানাং চ দারাণাং চাত্র সংস্থিতঃ ।

কিং নু তেষাং গৃহে ক্ষেমমক্ষেমং কিং নু সাম্প্রতম্ ॥ ২৪॥

কথং তে কিং নু সদ্বৃত্তা দুর্বৃত্তাঃ কিং নু মে সুতাঃ ॥ ২৫॥

রাজোবাচ ॥ ২৬॥

যৈর্নিরস্তো ভবাঁল্লুব্ধৈঃ পুত্রদারাদিভির্ধনৈঃ ॥ ২৭॥

তেষু কিং ভবতঃ স্নেহমনুবধ্নাতি মানসম্ ॥ ২৮॥

বৈশ্য উবাচ ॥ ২৯॥

এবমেতদ্যথা প্রাহ ভবানস্মদ্গতং বচঃ ॥ ৩০॥

কিং করোমি ন বধ্নাতি মম নিষ্ঠুরতাং মনঃ ।
যৈঃ সংত্যজ্য পিতৃস্নেহং ধনলুব্ধৈর্নিরাকৃতঃ ॥ ৩১॥

পতিস্বজনহার্দং চ হার্দিতেষ্বেব মে মনঃ ।
কিমেতন্নাভিজানামি জানন্নপি মহামতে ॥ ৩২॥

যৎপ্রেমপ্রবণং চিত্তং বিগুণেষ্বপি বন্ধুষু ।
তেষাং কৃতে মে নিঃশ্বাসো দৌর্মনস্যং চ জায়তে ॥ ৩৩॥

করোমি কিং যন্ন মনস্তেষ্বপ্রীতিষু নিষ্ঠুরম্ ॥ ৩৪॥

মার্কণ্ডেয় উবাচ ॥ ৩৫॥

ততস্তৌ সহিতৌ বিপ্র তং মুনিং সমুপস্থিতৌ ॥ ৩৬॥

সমাধির্নাম বৈশ্যোঽসৌ স চ পার্থিবসত্তমঃ ।
কৃত্বা তু তৌ যথান্যাযং যথার্হং তেন সংবিদম্ ॥ ৩৭॥

উপবিষ্টৌ কথাঃ কাশ্চিচ্চক্রতুর্বৈশ্যপার্থিবৌ ॥ ৩৮॥

রাজোবাচ ॥ ৩৯॥

ভগবংস্ত্বামহং প্রষ্টুমিচ্ছাম্যেকং বদস্ব তত্ ॥ ৪০॥

দুঃখায যন্মে মনসঃ স্বচিত্তাযত্ততাং বিনা ।
মমত্বং গতরাজ্যস্য রাজ্যাঙ্গেষ্বখিলেষ্বপি ॥ ৪১॥

জানতোঽপি যথাজ্ঞস্য কিমেতন্মুনিসত্তম ।
অযং চ নিকৃতঃ পুত্রৈর্দারৈর্ভৃত্যৈস্তথোজ্ঝিতঃ ॥ ৪২॥

স্বজনেন চ সংত্যক্তস্তেষু হার্দী তথাপ্যতি ।
এবমেষ তথাহং চ দ্বাবপ্যত্যন্তদুঃখিতৌ ॥ ৪৩॥

Stotram Digitalized By Sanskritdocuments.org

দৃষ্টদোষেঽপি বিষযে মমত্বাকৃষ্টমানসৌ ।

তৎকিমেতন্মহাভাগ যন্মোহো জ্ঞানিনোরপি ॥ ৪৪॥

মমাস্য চ ভবত্যেষা বিবেকান্ধস্য মূঢতা ॥ ৪৫॥

ঋষিরুবাচ ॥ ৪৬॥

জ্ঞানমস্তি সমস্তস্য জন্তোর্বিষযগোচরে ॥ ৪৭॥

বিষযাশ্চ মহাভাগ যান্তি চৈবং পৃথক্পৃথক্ ।

দিবান্ধাঃ প্রাণিনঃ কেচিদ্রাত্রাবন্ধাস্তথাপরে ॥ ৪৮॥

কেচিদ্দিবা তথা রাত্রৌ প্রাণিনস্তুল্যদৃষ্টযঃ ।

জ্ঞানিনো মনুজাঃ সত্যং কিং তু তে ন হি কেবলম্ ॥ ৪৯॥

যতো হি জ্ঞানিনঃ সর্বে পশুপক্ষিমৃগাদযঃ ।

জ্ঞানং চ তন্মনুষ্যাণাং যত্তেষাং মৃগপক্ষিণাম্ ॥ ৫০॥

মনুষ্যাণাং চ যত্তেষাং তুল্যমন্যত্তথোভযোঃ ।

জ্ঞানেঽপি সতি পশ্যৈতান্ পতঙ্গাঞ্ছাবচঞ্চুষু ॥ ৫১॥

কণমোক্ষাদৃতান্ মোহাৎপীড্যমানানপি ক্ষুধা ।

মানুষা মনুজব্যাঘ্র সাভিলাষাঃ সুতান্ প্রতি ॥ ৫২॥

লোভাত্ প্রত্যুপকারায নন্বেতান্ কিং ন পশ্যসি ।

তথাপি মমতাবর্ত্তে মোহগর্তে নিপাতিতাঃ ॥ ৫৩॥

মহামাযাপ্রভাবেণ সংসারস্থিতিকারিণা ।

তন্নাত্র বিস্ময়ঃ কার্যো যোগনিদ্রা জগৎপতেঃ ॥ ৫৪॥

মহামাযা হরেশ্চৈষা তযা সম্মোহ্যতে জগত্

জ্ঞানিনামপি চেতাংসি দেবী ভগবতী হি সা ॥ ৫৫॥

বলাদাকৃষ্য মোহায মহামাযা প্রযচ্ছতি ।

তযা বিসৃজ্যতে বিশ্বং জগদেতচ্চরাচরম্ ॥ ৫৬॥

সৈষা প্রসন্না বরদা নৃণাং ভবতি মুক্তযে ।

সা বিদ্যা পরমা মুক্তের্হেতুভূতা সনাতনী ॥ ৫৭॥

সংসারবন্ধহেতুশ্চ সৈব সর্বেশ্বরেশ্বরী ॥ ৫৮॥

রাজোবাচ ॥ ৫৯॥

ভগবন্ কা হি সা দেবী মহামাযেতি যাং ভবান্ ॥ ৬০॥

ব্রবীতি কথমুৎপন্না সা কর্মাস্যাশ্চ কিং দ্বিজ।

যৎপ্রভাবা চ সা দেবী যৎস্বরূপা যদুদ্ভবা ॥ ৬১॥

তৎসর্বং শ্রোতুমিচ্ছামি ত্বত্তো ব্রহ্মবিদাং বর ॥ ৬২॥

ঋষিরুবাচ ॥ ৬৩॥

নিত্যৈব সা জগন্মূর্তিস্তয়া সর্বমিদং ততম্ ॥ ৬৪॥

তথাপি তৎসমুৎপত্তির্বহুধা শ্রূয়তাং মম।

দেবানাং কার্যসিদ্ধ্যর্থমাবির্ভবতি সা যদা ॥ ৬৫॥

উৎপন্নেতি তদা লোকে সা নিত্যাপ্যভিধীযতে।

যোগনিদ্রাং যদা বিষ্ণুর্জগত্যেকার্ণবীকৃতে ॥ ৬৫॥

আস্তীর্য শেষমভজত্ কল্পান্তে ভগবান্ প্রভুঃ।

তদা দ্বাবসুরৌ ঘোরৌ বিখ্যাতৌ মধুকৈটভৌ ॥ ৬৭॥

বিষ্ণুকর্ণমলোদ্ভূতৌ হন্তুং ব্রহ্মাণমুদ্যতৌ।

স নাভিকমলে বিষ্ণোঃ স্থিতো ব্রহ্মা প্রজাপতিঃ ॥ ৬৮॥

দৃষ্ট্বা তাবসুরৌ চোগ্রৌ প্রসুপ্তং চ জনার্দনম্।

তুষ্টাব যোগনিদ্রাং তামেকাগ্রহৃদযঃ স্থিতঃ ॥ ৬৯॥

বিবোধনার্থায হরের্হরিনেত্রকৃতালযাম্ ।

বিশ্বেশ্বরীং জগদ্ধাত্রীং স্থিতিসংহারকারিণীম্ ॥ ৭০॥

নিদ্রাং ভগবতীং বিষ্ণোরতুলাং তেজসঃ প্রভুঃ ॥ ৭১॥

ব্রহ্মোবাচ ॥ ৭২॥

ত্বং স্বাহা ত্বং স্বধা ত্বং হি বষট্কারঃ স্বরাত্মিকা ॥ ৭৩॥

সুধা ত্বমক্ষরে নিত্যে ত্রিধা মাত্রাত্মিকা স্থিতা ।

অর্ধমাত্রা স্থিতা নিত্যা যানুচ্চার্যাবিশেষতঃ ॥ ৭৪॥

ত্বমেব সংধ্যা সাবিত্রী ত্বং দেবি জননী পরা ।

ত্বযৈতদ্ধার্যতে বিশ্বং ত্বযৈতত্ সৃজ্যতে জগত্ ॥ ৭৫॥

ত্বযৈতত্ পাল্যতে দেবি ত্বমৎস্যন্তে চ সর্বদা ।

বিসৃষ্টৌ সৃষ্টিরূপা ত্বং স্থিতিরূপা চ পালনে ॥ ৭৬॥

তথা সংহৃতিরূপান্তে জগতোঽস্য জগন্ময়ে ।

মহাবিদ্যা মহামাযা মহামেধা মহাস্মৃতিঃ ॥ ৭৭॥

মহামোহা চ ভবতী মহাদেবী মহেশ্বরী ।

প্রকৃতিস্ত্বং চ সর্বস্য গুণত্রযবিভাবিনী ॥ ৭৮॥

কালরাত্রির্মহারাত্রির্মোহরাত্রিশ্চ দারুণা ।

ত্বং শ্রীস্ত্বমীশ্বরী ত্বং হ্রীস্ত্বং বুদ্ধির্বোধলক্ষণা ॥ ৭৯॥

লজ্জা পুষ্টিস্তথা তুষ্টিস্ত্বং শান্তিঃ ক্ষান্তিরেব চ ।

খড্গিনী শূলিনী ঘোরা গদিনী চক্রিণী তথা ॥ ৮০॥

শঙ্খিনী চাপিনী বাণভুশুণ্ডীপরিঘাযুধা ।

সৌম্যা সৌম্যতরাশেষসৌম্যেভ্যস্ত্বতিসুন্দরী ॥ ৮১॥

পরাপরাণাং পরমা ত্বমেব পরমেশ্বরী ।

যচ্চ কিংচিৎক্বচিদ্বস্তু সদসদ্বাখিলাত্মিকে ॥ ৮২॥

তস্য সর্বস্য যা শক্তিঃ সা ত্বং কিং স্তূযসে মযা ।

যযা ত্বযা জগৎস্রষ্টা জগৎপাত্যত্তি যো জগত্ ॥ ৮৩॥

সোঽপি নিদ্রাবশং নীতঃ কস্ত্বাং স্তোতুমিহেশ্বরঃ ।

বিষ্ণুঃ শরীরগ্রহণমহমীশান এব চ ॥ ৮৪॥

কারিতাস্তে যতোঽতস্ত্বাং কঃ স্তোতুং শক্তিমান্ ভবেত্ ।

সা ত্বমিত্থং প্রভাবৈঃ স্বৈরুদারৈর্দেবি সংস্তুতা ॥ ৮৫॥

মোহয়ৈতৌ দুরাধর্ষাবসুরৌ মধুকৈটভৌ ।

প্রবোধং চ জগৎস্বামী নীযতামচ্যুতো লঘু ॥ ৮৬॥

বোধশ্চ ক্রিযতামস্য হন্তুমেতৌ মহাসুরৌ ॥ ৮৭॥

ঋষিরুবাচ ॥ ৮৮॥

এবং স্তুতা তদা দেবী তামসী তত্র বেধসা ॥ ৮৯॥

বিষ্ণোঃ প্রবোধনার্থায নিহন্তুং মধুকৈটভৌ ।

নেত্রাস্যনাসিকাবাহুহৃদযেভ্যস্তথোরসঃ ॥ ৯০॥

নির্গম্য দর্শনে তস্থৌ ব্রহ্মণোঽব্যক্তজন্মনঃ ।

উত্তস্থৌ চ জগন্নাথস্তযা মুক্তো জনার্দনঃ ॥ ৯১॥

একার্ণবেঽহিশযনাত্ততঃ স দদৃশে চ তৌ ।

মধুকৈটভৌ দুরাত্মানাবতিবীর্যপরাক্রমৌ ॥ ৯২॥

ক্রোধরক্তেক্ষণাবত্তুং ব্রহ্মাণং জনিতোদ্যমৌ ।

সমুত্থায ততস্তাভ্যাং যুযুধে ভগবান্ হরিঃ ॥ ৯৩॥

পঞ্চবর্ষসহস্রাণি বাহুপ্রহরণো বিভুঃ।

তাবপ্যতিবলোন্মত্তৌ মহামায়াবিমোহিতৌ ॥ ৯৪॥

উক্তবন্তৌ বরোঽস্মত্তো ব্রিয়তামিতি কেশবম্ ॥ ৯৫॥

শ্রীভগবানুবাচ ॥ ৯৬॥

ভবেতামদ্য মে তুষ্টৌ মম বধ্যাবুভাবপি ॥ ৯৭॥

কিমন্যেন বরেণাত্র এতাবদ্ধি বৃতং মযা ॥ ৯৮॥

ঋষিরুবাচ ॥ ৯৯॥

বঞ্চিতাভ্যামিতি তদা সর্বমাপোমযং জগত্ ॥ ১০০॥

বিলোক্য তাভ্যাং গদিতো ভগবান্ কমলেক্ষণঃ।

আবাং জহি ন যত্রোর্বী সলিলেন পরিপ্লুতা ॥ ১০১॥

ঋষিরুবাচ ॥ ১০২॥

তথেত্যুক্ত্বা ভগবতা শঙ্খচক্রগদাভৃতা।

কৃত্বা চক্রেণ বৈ ছিন্নে জঘনে শিরসী তযোঃ ॥ ১০৩॥

এবমেষা সমুৎপন্না ব্রহ্মণা সংস্তুতা স্বযম্ ।

প্রভাবমস্যা দেব্যাস্তু ভূযঃ শৃণু বদামি তে ॥ ১০৪॥

। ঐং ওঁ ।

॥ স্বস্তি শ্রীমার্কণ্ডেযপুরাণে সাবর্ণিকে মন্বন্তরে দেবীমাহাত্ম্যে

মধুকৈটভবধো নাম প্রথমোঽধ্যাযঃ ॥ ১॥

॥ দ্বিতীযোঽধ্যাযঃ ॥

বিনিযোগঃ

অস্য শ্রী মধ্যমচরিত্রস্য বিষ্ণুরৃষিঃ ।

শ্রীমহালক্ষ্মীর্দেবতা ।

উষ্ণিক্ ছন্দঃ । শাকম্ভরী শক্তিঃ । দুর্গা বীজম্ ।

বাযুস্তত্ত্বম্ ।

যজুর্বেদঃ স্বরূপম্ । শ্রীমহালক্ষ্মীপ্রীত্যর্থে

মধ্যমচরিত্রজপে বিনিযোগঃ ।

। ধ্যানম্ ।

ওঁ অক্ষস্রক্পরশূ গদেষুকুলিশং পদ্মং ধনুঃ কুণ্ডিকাং

দণ্ডং শক্তিমসিং চ চর্ম জলজং ঘণ্টাং সুরাভাজনম্ ।

শূলং পাশসুদর্শনে চ দধতীং হস্তৈঃ প্রবালপ্রভাং

সেবে সৈরিভমর্দিনীমিহ মহালক্ষ্মীং সরোজস্থিতাম্ ॥

ওঁ হ্রীং ঋষিরুবাচ ॥ ১॥

দেবাসুরমভূদ্যুদ্ধং পূর্ণমব্দশতং পুরা ।

মহিষেঽসুরাণামধিপে দেবানাং চ পুরন্দরে ॥ ২॥

তত্রাসুরৈর্মহাবীর্যৈর্দেবসৈন্যং পরাজিতম্ ।

জিত্বা চ সকলান্ দেবানিন্দ্রোঽভূন্মহিষাসুরঃ ॥ ৩॥

ততঃ পরাজিতা দেবাঃ পদ্মযোনিং প্রজাপতিম্ ।

পুরস্কৃত্য গতাস্তত্র যত্রেশগরুডধ্বজৌ ॥ ৪॥

যথাবৃত্তং তযোস্তদ্বন্মহিষাসুরচেষ্টিতম্ ।

ত্রিদশাঃ কথযামাসুর্দেবাভিভববিস্তরম্ ॥ ৫॥

সূর্যেন্দ্রাগ্ন্যনিলেন্দূনাং যমস্য বরুণস্য চ ।

অন্যেষাং চাধিকারান্স স্বযমেবাধিতিষ্ঠতি ॥ ৬॥

স্বর্গান্নিরাকৃতাঃ সর্বে তেন দেবগণা ভুবি ।

বিচরন্তি যথা মর্ত্যা মহিষেণ দুরাত্মনা ॥ ৭॥

এতদ্বঃ কথিতং সর্বমমরারিবিচেষ্টিতম্ ।

শরণং বঃ প্রপন্নাঃ স্মো বধস্তস্য বিচিন্ত্যতাম্ ॥ ৮॥

ইত্থং নিশম্য দেবানাং বচাংসি মধুসূদনঃ ।

চকার কোপং শম্ভুশ্চ ভ্রূকুটীকুটিলাননৌ ॥ ৯॥

ততোঽতিকোপপূর্ণস্য চক্রিণো বদনাত্ততঃ ।

নিশ্চক্রাম মহত্তেজো ব্রহ্মণঃ শঙ্করস্য চ ॥ ১০॥

অন্যেষাং চৈব দেবানাং শক্রাদীনাং শরীরতঃ ।

নির্গতং সুমহত্তেজস্তচ্চৈক্যং সমগচ্ছত ॥ ১১॥

অতীব তেজসঃ কূটং জ্বলন্তমিব পর্বতম্ ।

দদৃশুস্তে সুরাস্তত্র জ্বালাব্যাপ্তদিগন্তরম্ ॥ ১২॥

অতুলং তত্র তত্তেজঃ সর্বদেবশরীরজম্ ।

একস্থং তদভূন্নারী ব্যাপ্তলোকত্রয়ং ত্বিষা ॥ ১৩॥

যদভূচ্ছাম্ভবং তেজস্তেনাজায়ত তন্মুখম্ ।

যাম্যেন চাভবন্ কেশা বাহবো বিষ্ণুতেজসা ॥ ১৪॥

সৌম্যেন স্তনযোর্যুগ্মং মধ্যং চৈন্দ্রেণ চাভবত্ ।

বারুণেন চ জঙ্ঘোরূ নিতম্বস্তেজসা ভুবঃ ॥ ১৫॥

ব্রহ্মণস্তেজসা পাদৌ তদঙ্গুল্যোঽর্কতেজসা ।

বসূনাং চ করাঙ্গুল্যঃ কৌবেরেণ চ নাসিকা ॥ ১৬॥

তস্যাস্তু দন্তাঃ সম্ভূতাঃ প্রাজাপত্যেন তেজসা ।

নয়নত্রিতয়ং জজ্ঞে তথা পাবকতেজসা ॥ ১৭॥

ভ্রুবৌ চ সংধ্যয়োস্তেজঃ শ্রবণাবনিলস্য চ ।

অন্যেষাং চৈব দেবানাং সম্ভবস্তেজসাং শিবা ॥ ১৮॥

ততঃ সমস্তদেবানাং তেজোরাশিসমুদ্ভবাম্ ।

তাং বিলোক্য মুদং প্রাপুরমরা মহিষার্দিতাঃ ।

ততো দেবা দদুস্তস্যৈ স্বানি স্বান্যায়ুধানি চ ॥ ১৯॥

শূলং শূলাদ্বিনিষ্কৃষ্য দদৌ তস্যৈ পিনাকধৃক্ ।

চক্রং চ দত্তবান্ কৃষ্ণঃ সমুৎপাট্য স্বচক্রতঃ ॥ ২০॥

শঙ্খং চ বরুণঃ শক্তিং দদৌ তস্যৈ হুতাশনঃ ।

মারুতো দত্তবাংশ্চাপং বাণপূর্ণে তথেষুধী ॥ ২১॥

বজ্রমিন্দ্রঃ সমুৎপাট্য কুলিশাদমরাধিপঃ ।

দদৌ তস্যৈ সহস্রাক্ষো ঘণ্টামৈরাবতাদ্গজাত্ ॥ ২২॥

কালদণ্ডাদ্যমো দণ্ডং পাশং চাম্বুপতির্দদৌ ।

প্রজাপতিশ্চাক্ষমালাং দদৌ ব্রহ্মা কমণ্ডলুম্ ॥ ২৩॥

সমস্তরোমকূপেষু নিজরশ্মীন্ দিবাকরঃ ।
কালশ্চ দত্তবান্ খড্গং তস্যৈ চর্ম চ নির্মলম্ ॥ ২৪॥

ক্ষীরোদশ্চামলং হারমজরে চ তথাম্বরে ।
চূডামণিং তথা দিব্যং কুণ্ডলে কটকানি চ ॥ ২৫॥

অর্ধচন্দ্রং তথা শুভ্রং কেযূরান্ সর্ববাহুষু ।
নূপুরৌ বিমলৌ তদ্বদ্ গ্রৈবেযকমনুত্তমম্ ॥ ২৬॥

অঙ্গুলীযকরত্নানি সমস্তাস্বঙ্গুলীষু চ ।
বিশ্বকর্মা দদৌ তস্যৈ পরশুং চাতিনির্মলম্ ॥ ২৭॥

অস্ত্রাণ্যনেকরূপাণি তথাভেদ্যং চ দংশনম্ ।
অম্লানপঙ্কজাং মালাং শিরস্যুরসি চাপরাম্ ॥ ২৮॥

অদদজ্জলধিস্তস্যৈ পঙ্কজং চাতিশোভনম্ ।
হিমবান্ বাহনং সিংহং রত্নানি বিবিধানি চ ॥ ২৯॥

দদাবশূন্যং সুরযা পানপাত্রং ধনাধিপঃ ।
শেষশ্চ সর্বনাগেশো মহামণিবিভূষিতম্ ॥ ৩০॥

নাগহারং দদৌ তস্যৈ ধত্তে যঃ পৃথিবীমিমাম্ ।
অন্যৈরপি সুরৈর্দেবী ভূষণৈরাযুধৈস্তথা ॥ ৩১॥

সম্মানিতা ননাদোচ্চৈঃ সাট্টহাসং মুহুর্মুহুঃ ।
তস্যা নাদেন ঘোরেণ কৃৎস্নমাপূরিতং নভঃ ॥ ৩২॥

অমাযতাতিমহতা প্রতিশব্দো মহানভূৎ ।
চুক্ষুভুঃ সকলা লোকাঃ সমুদ্রাশ্চ চকম্পিরে ॥ ৩৩॥

চচাল বসুধা চেলুঃ সকলাশ্চ মহীধরাঃ ।
জযেতি দেবাশ্চ মুদা তামূচুঃ সিংহবাহিনীম্ ॥ ৩৪॥

তুষ্টুবুর্মুনযশ্চৈনাং ভক্তিনম্রাত্মমূর্তযঃ ।
দৃষ্ট্বা সমস্তং সংক্ষুব্ধং ত্রৈলোক্যমমরারযঃ ॥ ৩৫॥

সন্নদ্ধাখিলসৈন্যাস্তে সমুত্তস্থুরুদাযুধাঃ ।
আঃ কিমেতদিতি ক্রোধাদাভাষ্য মহিষাসুরঃ ॥ ৩৬॥

অভ্যধাবত তং শব্দমশেষৈরসুরৈর্বৃতঃ ।
স দদর্শ ততো দেবীং ব্যাপ্তলোকত্রযাং ত্বিষা ॥ ৩৭॥

পাদাক্রান্ত্যা নতভুবং কিরীটোল্লিখিতাম্বরাম্ ।

ক্ষোভিতাশেষপাতালাং ধনুর্জ্যানিঃস্বনেন তাম্ ॥ ৩৮॥

দিশো ভুজসহস্রেণ সমন্তাদ্ব্যাপ্য সংস্থিতাম্ ।

ততঃ প্রববৃতে যুদ্ধং তযা দেব্যা সুরদ্বিষাম্ ॥ ৩৯॥

শস্ত্রাস্ত্রৈর্বহুধা মুক্তৈরাদীপিতদিগন্তরম্ ।

মহিষাসুরসেনানীশ্চিক্ষুরাখ্যো মহাসুরঃ ॥ ৪০॥

যুযুধে চামরশ্চান্যৈশ্চতুরঙ্গবলান্বিতঃ ।

রথানামযুতৈঃ ষড্ভিরুদগ্রাখ্যো মহাসুরঃ ॥ ৪১॥

অযুধ্যতাযুতানাং চ সহস্রেণ মহাহনুঃ ।

পঞ্চাশদ্ভিশ্চ নিযুতৈরসিলোমা মহাসুরঃ ॥ ৪২॥

অযুতানাং শতৈঃ ষড্ভির্বাষ্কলো যুযুধে রণে ।

গজবাজিসহস্রৌঘৈরনেকৈঃ পরিবারিতঃ ॥ ৪৩॥

বৃতো রথানাং কোট্যা চ যুদ্ধে তস্মিন্নযুধ্যত ।

বিডালাখ্যোঽযুতানাং চ পঞ্চাশদ্ভিরথাযুতৈঃ ॥ ৪৪॥

যুযুধে সংযুগে তত্র রথানাং পরিবারিতঃ ।

অন্যে চ তত্রাযুতশো রথনাগহযৈর্বৃতাঃ ॥ ৪৫॥

যুযুধুঃ সংযুগে দেব্যা সহ তত্র মহাসুরাঃ ।

কোটিকোটিসহস্রৈস্তু রথানাং দন্তিনাং তথা ॥ ৪৬॥

হযানাং চ বৃতো যুদ্ধে তত্রাভূন্মহিষাসুরঃ ।

তোমরৈর্ভিন্দিপালৈশ্চ শক্তিভির্মুসলৈস্তথা ॥ ৪৭॥

যুযুধুঃ সংযুগে দেব্যা খড্গৈঃ পরশুপট্টিশৈঃ ।

কেচিচ্চ চিক্ষিপুঃ শক্তীঃ কেচিত্ পাশাংস্তথাপরে ॥ ৪৮॥

দেবীং খড্গপ্রহারৈস্তু তে তাং হন্তুং প্রচক্রমুঃ ।

সাপি দেবী ততস্তানি শস্ত্রাণ্যস্ত্রাণি চণ্ডিকা ॥ ৪৯॥

লীলযৈব প্রচিচ্ছেদ নিজশস্ত্রাস্ত্রবর্ষিণী ।

অনাযস্তাননা দেবী স্তূযমানা সুরর্ষিভিঃ ॥ ৫০॥

মুমোচাসুরদেহেষু শস্ত্রাণ্যস্ত্রাণি চেশ্বরী ।

সোঽপি ক্রুদ্ধো ধুতসটো দেব্যা বাহনকেসরী ॥ ৫১॥

চচারাসুরসৈন্যেষু বনেষ্বিব হুতাশনঃ ।

নিঃশ্বাসান্ মুমুচে যাংশ্চ যুধ্যমানা রণেঽম্বিকা ॥ ৫২॥

ত এব সদ্যঃ সম্ভূতা গণাঃ শতসহস্রশঃ ।

যুযুধুস্তে পরশুভির্ভিন্দিপালাসিপট্টিশৈঃ ॥ ৫৩॥

নাশযন্তোঽসুরগণান্ দেবীশক্ত্যুপবৃংহিতাঃ ।

অবাদযন্ত পটহান্ গণাঃ শঙ্খাংস্তথাপরে ॥ ৫৪॥

মৃদঙ্গাংশ্চ তথৈবান্যে তস্মিন্ যুদ্ধমহোৎসবে ।

ততো দেবী ত্রিশূলেন গদযা শক্তিবৃষ্টিভিঃ ॥ ৫৫॥

খড্গাদিভিশ্চ শতশো নিজঘান মহাসুরান্ ।

পাতযামাস চৈবান্যান্ ঘণ্টাস্বনবিমোহিতান্ ॥ ৫৬॥

অসুরান্ ভুবি পাশেন বদ্ধ্বা চান্যানকর্ষযত্ ।

কেচিদ্ দ্বিধাকৃতাস্তীক্ষ্ণৈঃ খড্গপাতৈস্তথাপরে ॥ ৫৭॥

বিপোথিতা নিপাতেন গদযা ভুবি শেরতে ।

বেমুশ্চ কেচিদ্রুধিরং মুসলেন ভৃশং হতাঃ ॥ ৫৮॥

কেচিন্নিপতিতা ভূমৌ ভিন্নাঃ শূলেন বক্ষসি ।

নিরন্তরাঃ শরৌঘেণ কৃতাঃ কেচিদ্রণাজিরে ॥ ৫৯॥

শ্যেনানুকারিণঃ প্রাণান্ মুমুচুস্ত্রিদশার্দনাঃ ।

কেষাংচিদ্ বাহবশ্ছিন্নাশ্ছিন্নগ্রীবাস্তথাপরে ॥ ৬০॥

শিরাংসি পেতুরন্যেষামন্যে মধ্যে বিদারিতাঃ ।

বিচ্ছিন্নজঙ্ঘাস্ত্বপরে পেতুরুর্ব্যাং মহাসুরাঃ ॥ ৬১ ॥

একবাহ্বক্ষিচরণাঃ কেচিদ্দেব্যা দ্বিধাকৃতাঃ ।

ছিন্নেঽপি চান্যে শিরসি পতিতাঃ পুনরুত্থিতাঃ ॥ ৬২ ॥

কবন্ধা যুযুধুর্দেব্যা গৃহীতপরমাযুধাঃ ।

ননৃতুশ্চাপরে তত্র যুদ্ধে তূর্যলযাশ্রিতাঃ ॥ ৬৩॥

কবন্ধাশ্ছিন্নশিরসঃ খড্গশক্ত্যৃষ্টিপাণযঃ ।

তিষ্ঠ তিষ্ঠেতি ভাষন্তো দেবীমন্যে মহাসুরাঃ ॥ ৬৪ ॥

পাতিতৈ রথনাগাশ্বৈরসুরৈশ্চ বসুন্ধরা ।

অগম্যা সাভবত্তত্র যত্রাভূৎ স মহারণঃ ॥ ৬৫॥

শোণিতৌঘা মহানদ্যঃ সদ্যস্তত্র প্রসুস্রুবুঃ ।

মধ্যে চাসুরসৈন্যস্য বারণাসুরবাজিনাম্ ॥ ৬৬॥

ক্ষণেন তন্মহাসৈন্যমসুরাণাং তথাম্বিকা ।

নিন্যে ক্ষযং যথা বহ্নিস্তৃণদারুমহাচযম্ ॥ ৬৭॥

স চ সিংহো মহানাদমুৎসৃজন্ ধুতকেসরঃ ।

শরীরেভ্যোঽমরারীণামসূনিব বিচিন্বতি ॥ ৬৮॥

দেব্যা গণৈশ্চ তৈস্তত্র কৃতং যুদ্ধং তথাসুরৈঃ ।
যথৈষাং তুতুষুর্দেবাঃ পুষ্পবৃষ্টিমুচো দিবি ॥ ৬৯॥

॥ স্বস্তি শ্রীমার্কণ্ডেয়পুরাণে সাবর্ণিকে মন্বন্তরে দেবীমাহাত্ম্যে

মহিষাসুরসৈন্যবধো নাম দ্বিতীয়োঽধ্যায়ঃ ॥ ২ ॥

॥ তৃতীয়োঽধ্যায়ঃ ॥

ওঁ ঋষিরুবাচ ॥ ১॥

নিহন্যমানং তৎসৈন্যমবলোক্য মহাসুরঃ ।
সেনানীশ্চিক্ষুরঃ কোপাদ্যযৌ যোদ্ধুমথাম্বিকাম্ ॥ ২ ॥

স দেবীং শরবর্ষেণ ববর্ষ সমরেঽসুরঃ ।
যথা মেরুগিরেঃ শৃঙ্গং তোয়বর্ষেণ তোয়দঃ ॥ ৩॥

তস্য ছিত্ত্বা ততো দেবী লীলয়ৈব শরোৎকরান্ ।
জঘান তুরগান্বাণৈর্যন্তারং চৈব বাজিনাম্ ॥ ৪ ॥

চিচ্ছেদ চ ধনুঃ সদ্যো ধ্বজং চাতিসমুচ্ছৃতম্ ।
বিব্যাধ চৈব গাত্রেষু ছিন্নধন্বানমাশুগৈঃ ॥ ৫॥

সচ্ছিন্নধন্বা বিরথো হতাশ্বো হতসারথিঃ ।
অভ্যধাবত তাং দেবীং খড্গচর্মধরোঽসুরঃ ॥ ৬॥

সিংহমাহত্য খড্গেন তীক্ষ্ণধারেণ মূর্ধনি ।
আজঘান ভুজে সব্যে দেবীমপ্যতিবেগবান্ ॥ ৭॥

তস্যাঃ খড্গো ভুজং প্রাপ্য পফাল নৃপনন্দন ।
ততো জগ্রাহ শূলং স কোপাদরুণলোচনঃ ॥ ৮॥

চিক্ষেপ চ ততস্তত্তু ভদ্রকাল্যাং মহাসুরঃ ।
জাজ্বল্যমানং তেজোভী রবিবিম্বমিবাম্বরাত্ ॥ ৯॥

দৃষ্ট্বা তদাপতচ্ছূলং দেবী শূলমমুঞ্চত ।
তেন তচ্ছতধা নীতং শূলং স চ মহাসুরঃ ॥ ১০॥

হতে তস্মিন্মহাবীর্যে মহিষস্য চমূপতৌ ।
আজগাম গজারূঢশ্চামরস্ত্রিদশার্দনঃ ॥ ১১॥

সোঽপি শক্তিং মুমোচাথ দেব্যাস্তামম্বিকা দ্রুতম্ ।

হুংকারাভিহতাং ভূমৌ পাতযামাস নিষ্প্রভাম্ ॥ ১২॥

ভগ্নাং শক্তিং নিপতিতাং দৃষ্ট্বা ক্রোধসমন্বিতঃ ।
চিক্ষেপ চামরঃ শূলং বাণৈস্তদপি সাচ্ছিনত্ ॥ ১৩॥

ততঃ সিংহঃ সমুৎপত্য গজকুম্ভান্তরে স্থিতঃ ।
বাহুযুদ্ধেন যুযুধে তেনোচ্চৈস্ত্রিদশারিণা ॥ ১৪॥

যুধ্যমানৌ ততস্তৌ তু তস্মান্নাগান্মহীং গতৌ ।
যুযুধাতেঽতিসংরব্ধৌ প্রহারৈরতিদারুণৈঃ ॥ ১৫॥

ততো বেগাত্ খমুৎপত্য নিপত্য চ মৃগারিণা ।
করপ্রহারেণ শিরশ্চামরস্য পৃথক্ কৃতম্ ॥ ১৬॥

উদগ্রশ্চ রণে দেব্যা শিলাবৃক্ষাদিভির্হতঃ ।
দন্তমুষ্টিতলৈশ্চৈব করালশ্চ নিপাতিতঃ ॥ ১৭॥

দেবী ক্রুদ্ধা গদাপাতৈশ্চূর্ণযামাস চোদ্ধতম্ ।
বাষ্কলং ভিন্দিপালেন বাণৈস্তাম্রং তথান্ধকম্ ॥ ১৮॥

উগ্রাস্যমুগ্রবীর্যং চ তথৈব চ মহাহনুম্ ।
ত্রিনেত্রা চ ত্রিশূলেন জঘান পরমেশ্বরী ॥ ১৯॥

বিডালস্যাসিনা কাযাত্ পাতযামাস বৈ শিরঃ ।

দুর্ধরং দুর্মুখং চোভৌ শরৈর্নিন্যে যমক্ষযম্ ॥ ২০॥

এবং সংক্ষীযমাণে তু স্বসৈন্যে মহিষাসুরঃ ।

মাহিষেণ স্বরূপেণ ত্রাসযামাস তান্ গণান্ ॥ ২১॥

কাংশ্চিত্তুণ্ডপ্রহারেণ খুরক্ষেপৈস্তথাপরান্ ।

লাঙ্গূলতাডিতাংশ্চান্যান্ শৃঙ্গাভ্যাং চ বিদারিতান্ ॥ ২২॥

বেগেন কাংশ্চিদপরান্নাদেন ভ্রমণেন চ ।

নিঃশ্বাসপবনেনান্যান্পাতযামাস ভূতলে ॥ ২৩॥

নিপাত্য প্রমথানীকমভ্যধাবত সোঽসুরঃ ।

সিংহং হন্তুং মহাদেব্যাঃ কোপং চক্রে ততোঽম্বিকা ॥ ২৪॥

সোঽপি কোপান্মহাবীর্যঃ খুরক্ষুণ্ণমহীতলঃ ।

শৃঙ্গাভ্যাং পর্বতানুচ্চাংশ্চিক্ষেপ চ ননাদ চ ॥ ২৫॥

বেগভ্রমণবিক্ষুণ্ণা মহী তস্য ব্যশীর্যত ।

লাঙ্গূলেনাহতশ্চাব্ধিঃ প্লাবযামাস সর্বতঃ ॥ ২৬॥

ধুতশৃঙ্গবিভিন্নাশ্চ খণ্ডং খণ্ডং যযুর্ঘনাঃ ।

শ্বাসানিলাস্তাঃ শতশো নিপেতুর্নভসোঽচলাঃ ॥ ২৭॥

ইতি ক্রোধসমাধ্মাতমাপতন্তং মহাসুরম্ ।

দৃষ্ট্বা সা চণ্ডিকা কোপং তদ্বধায তদাকরোত্ ॥ ২৮॥

সা ক্ষিপ্ত্বা তস্য বৈ পাশং তং ববন্ধ মহাসুরম্ ।

তত্যাজ মাহিষং রূপং সোঽপি বদ্ধো মহামৃধে ॥ ২৯॥

ততঃ সিংহোঽভবৎসদ্যো যাবত্তস্যাম্বিকা শিরঃ ।

ছিনত্তি তাবত্ পুরুষঃ খড্গপাণিরদৃশ্যত ॥ ৩০॥

তত এবাশু পুরুষং দেবী চিচ্ছেদ সাযকৈঃ ।

তং খড্গচর্মণা সার্ধং ততঃ সোঽভূন্মহাগজঃ ॥ ৩১॥

করেণ চ মহাসিংহং তং চকর্ষ জগর্জ চ ।

কর্ষতস্তু করং দেবী খড্গেন নিরকৃন্তত ॥ ৩২॥

ততো মহাসুরো ভূযো মাহিষং বপুরাস্থিতঃ ।

তথৈব ক্ষোভযামাস ত্রৈলোক্যং সচরাচরম্ ॥ ৩৩॥

ততঃ ক্রুদ্ধা জগন্মাতা চণ্ডিকা পানমুত্তমম্ ।

পপৌ পুনঃ পুনশ্চৈব জহাসারুণলোচনা ॥ ৩৪॥

ননর্দ চাসুরঃ সোঽপি বলবীর্যমদোদ্ধতঃ ।

বিষাণাভ্যাং চ চিক্ষেপ চণ্ডিকাং প্রতি ভূধরান্ ॥ ৩৫॥

সা চ তান্প্রহিতাংস্তেন চূর্ণযন্তী শরোৎকরৈঃ ।

উবাচ তং মদোদ্ধূতমুখরাগাকুলাক্ষরম্ ॥ ৩৬॥

দেব্যুবাচ ॥ ৩৭॥

গর্জ গর্জ ক্ষণং মূঢ মধু যাবৎপিবাম্যহম্ ।

মযা ত্বযি হতেঽত্রৈব গর্জিষ্যন্ত্যাশু দেবতাঃ ॥ ৩৮॥

ঋষিরুবাচ ॥ ৩৯॥

এবমুক্ত্বা সমুৎপত্য সারূঢা তং মহাসুরম্ ।

পাদেনাক্রম্য কণ্ঠে চ শূলেনৈনমতাডযত্ ॥ ৪০॥

ততঃ সোঽপি পদাক্রান্তস্তযা নিজমুখাত্তদা ।

অর্ধনিষ্ক্রান্ত এবাসীদ্দেব্যা বীর্যেণ সংবৃতঃ ॥ ৪১॥

অর্ধনিষ্ক্রান্ত এবাসৌ যুধ্যমানো মহাসুরঃ ।

তযা মহাসিনা দেব্যা শিরশ্ছিত্ত্বা নিপাতিতঃ ॥ ৪২॥

ততো হাহাকৃতং সর্বং দৈত্যসৈন্যং ননাশ তত্ ।

প্রহর্ষং চ পরং জগ্মুঃ সকলা দেবতাগণাঃ ॥ ৪৩॥

তুষ্টুবুস্তাং সুরা দেবীং সহদিব্যৈর্মহর্ষিভিঃ ।

জগুর্গন্ধর্বপতয়ো ননৃতুশ্চাপ্সরোগণাঃ ॥ ৪৪ ॥

॥ স্বস্তি শ্রীমার্কণ্ডেয়পুরাণে সাবর্ণিকে মন্বন্তরে দেবীমাহাত্ম্যে

মহিষাসুরবধো নাম তৃতীয়োঽধ্যায়ঃ ॥ ৩॥

॥ চতুর্থোঽধ্যায়ঃ ॥

ॐ ঋষিরুবাচ ॥ ১ ॥

শক্রাদয়ঃ সুরগণা নিহতেঽতিবীর্যে

তস্মিন্দুরাত্মনি সুরারিবলে চ দেব্যা ।

তাং তুষ্টুবুঃ প্রণতিনম্রশিরোধরাংসা

বাগ্ভিঃ প্রহর্ষপুলকোদ্গমচারুদেহাঃ ॥ ২ ॥

দেব্যা যযা ততমিদং জগদাত্মশক্ত্যা

নিঃশেষদেবগণশক্তিসমূহমূর্ত্যা ।

তামম্বিকামখিলদেবমহর্ষিপূজ্যাং

ভক্ত্যা নতাঃ স্ম বিদধাতু শুভানি সা নঃ ॥ ৩॥

যস্যাঃ প্রভাবমতুলং ভগবাননন্তো

ব্রহ্মা হরশ্চ ন হি বক্তুমলং বলং চ ।

সা চণ্ডিকাখিলজগৎপরিপালনায

নাশায চাশুভভযস্য মতিং করোতু ॥ ৪॥

যা শ্রীঃ স্বযং সুকৃতিনাং ভবনেষ্বলক্ষ্মীঃ

পাপাত্মনাং কৃতধিযাং হৃদযেষু বুদ্ধিঃ ।

শ্রদ্ধা সতাং কুলজনপ্রভবস্য লজ্জা

তাং ত্বাং নতাঃ স্ম পরিপালয দেবি বিশ্বম্ ॥ ৫॥

কিং বর্ণযাম তব রূপমচিন্ত্যমেতত্

কিংচাতিবীর্যমসুরক্ষযকারি ভূরি ।

কিং চাহবেষু চরিতানি তবাতি যানি

সর্বেষু দেব্যসুরদেবগণাদিকেষু ॥ ৬॥

হেতুঃ সমস্তজগতাং ত্রিগুণাপি দোষৈ-

র্ন জ্ঞাযসে হরিহরাদিভিরপ্যপারা ।

সর্বাশ্রযাখিলমিদং জগদংশভূত-

মব্যাকৃতা হি পরমা প্রকৃতিস্ত্বমাদ্যা ॥ ৭॥

যস্যাঃ সমস্তসুরতা সমুদীরণেন

তৃপ্তিং প্রযাতি সকলেষু মখেষু দেবি ।

স্বাহাসি বৈ পিতৃগণস্য চ তৃপ্তিহেতু-

রুচ্চার্যসে ত্বমত এব জনৈঃ স্বধা চ ॥ ৮॥

যা মুক্তিহেতুরবিচিন্ত্যমহাব্রতা ত্বং

অভ্যস্যসে সুনিযতেন্দ্রিযতত্ত্বসারৈঃ ।

মোক্ষার্থিভির্মুনিভিরস্তসমস্তদোষৈ-

র্বিদ্যাসি সা ভগবতী পরমা হি দেবি ॥ ৯॥

শব্দাত্মিকা সুবিমল{গ্য}।র্জুষাং নিধান-

মুদ্গীথরম্যপদপাঠবতাং চ সাম্নাম্ ।

দেবি ত্রযী ভগবতী ভবভাবনায

বার্তাসি সর্বজগতাং পরমা{তি}।র্হন্ত্রী ॥ ১০॥

মেধাসি দেবি বিদিতাখিলশাস্ত্রসারা

দুর্গাসি দুর্গভবসাগরনৌরসঙ্গা ।

শ্রীঃ কৈটভারিহৃদযৈককৃতাধিবাসা

গৌরী ত্বমেব শশিমৌলিকৃতপ্রতিষ্ঠা ॥ ১১॥

ঈষৎসহাসমমলং পরিপূর্ণচন্দ্র-

বিম্বানুকারি কনকোত্তমকান্তিকান্তম্ ।

অত্যদ্ভুতং প্রহৃতমাত্তরুষা তথাপি
বক্ত্রং বিলোক্য সহসা মহিষাসুরেণ ॥ ১২॥

দৃষ্ট্বা তু দেবি কুপিতং ভ্রুকুটীকরাল-
মুদ্যচ্ছশাঙ্কসদৃশচ্ছবি যন্ন সদ্যঃ।
প্রাণান্ মুমোচ মহিষস্তদতীব চিত্রং
কৈর্জীব্যতে হি কুপিতান্তকদর্শনেন ॥ ১৩॥

দেবি প্রসীদ পরমা ভবতী ভবায
সদ্যো বিনাশযসি কোপবতী কুলানি।
বিজ্ঞাতমেতদধুনৈব যদস্তমেত-
ন্নীতং বলং সুবিপুলং মহিষাসুরস্য ॥ ১৪॥

তে সম্মতা জনপদেষু ধনানি তেষাং
তেষাং যশাংসি ন চ সীদতি বন্ধুবর্গঃ।
ধন্যাস্ত এব নিভৃতাত্মজভৃত্যদারা
যেষাং সদাভ্যুদযদা ভবতী প্রসন্না ॥ ১৫॥

ধর্ম্যাণি দেবি সকলানি সদৈব কর্মা-
ণ্যত্যাদৃতঃ প্রতিদিনং সুকৃতী করোতি।
স্বর্গং প্রযাতি চ ততো ভবতী প্রসাদা-
ল্লোকত্রযেঽপি ফলদা ননু দেবি তেন ॥ ১৬॥

দুর্গে স্মৃতা হরসি ভীতিমশেষজন্তোঃ

স্বস্থৈঃ স্মৃতা মতিমতীব শুভাং দদাসি ।

দারিদ্রদুঃখভযহারিণি কা ত্বদন্যা

সর্বোপকারকরণায সদা{দ্র}ার্চিত্তা ॥ ১৭॥

এভির্হতৈর্জগদুপৈতি সুখং তথৈতে

কুর্বন্তু নাম নরকায চিরায পাপম্ ।

সংগ্রামমৃত্যুমধিগম্য দিবং প্রযান্তু

মত্বেতি নূনমহিতান্বিনিহংসি দেবি ॥ ১৮॥

দৃষ্ট্বৈব কিং ন ভবতী প্রকরোতি ভস্ম

সর্বাসুরানরিষু যৎপ্রহিণোষি শস্ত্রম্ ।

লোকান্প্রযান্তু রিপবোঽপি হি শস্ত্রপূতা

ইত্থং মতির্ভবতি তেষ্বহিতেষুসাধ্বী ॥ ১৯॥

খড্গপ্রভানিকরবিস্ফুরণৈস্তথোগ্রৈঃ

শূলাগ্রকান্তিনিবহেন দৃশোঽসুরাণাম্ ।

যন্নাগতা বিলযমংশুমদিন্দুখণ্ড-

যোগ্যাননং তব বিলোকযতাং তদেতত্ ॥ ২০॥

দুর্বৃত্তবৃত্তশমনং তব দেবি শীলং

রূপং তথৈতদবিচিন্ত্যমতুল্যমন্যৈঃ ।

বীর্যং চ হন্তৃ হৃতদেবপরাক্রমাণাং

বৈরিষ্বপি প্রকটিতৈব দযা ত্বযেত্থম্ ॥ ২১॥

কেনোপমা ভবতু তেঽস্য পরাক্রমস্য

রূপং চ শত্রুভযকার্যতিহারি কুত্র ।

চিত্তে কৃপা সমরনিষ্ঠুরতা চ দৃষ্টা

ত্বয্যেব দেবি বরদে ভুবনত্রযেঽপি ॥ ২২॥

ত্রৈলোক্যমেতদখিলং রিপুনাশনেন

ত্রাতং ত্বযা সমরমূর্ধনি তেঽপি হত্বা ।

নীতা দিবং রিপুগণা ভযমপ্যপাস্তম্

অস্মাকমুন্মদসুরারিভবং নমস্তে ॥ ২৩॥

শূলেন পাহি নো দেবি পাহি খড্গেন চাম্বিকে ।

ঘণ্টাস্বনেন নঃ পাহি চাপজ্যানিঃস্বনেন চ ॥ ২৪॥

প্রাচ্যাং রক্ষ প্রতীচ্যাং চ চণ্ডিকে রক্ষ দক্ষিণে ।

ভ্রামণেনাত্মশূলস্য উত্তরস্যাং তথেশ্বরি ॥ ২৫॥

সৌম্যানি যানি রূপাণি ত্রৈলোক্যে বিচরন্তি তে ।

যানি চাত্যন্তঘোরাণি তৈ রক্ষাস্মাংস্তথা ভুবম্ ॥ ২৬॥

খড্গশূলগদাদীনি যানি চাস্ত্রানি তেঽম্বিকে ।

করপল্লবসঙ্গীনি তৈরস্মান্রক্ষ সর্বতঃ ॥ ২৭॥

ঋষিরুবাচ ॥ ২৮॥

এবং স্তুতা সুরৈর্দিব্যৈঃ কুসুমৈর্নন্দনোদ্ভবৈঃ ।

অর্চিতা জগতাং ধাত্রী তথা গন্ধানুলেপনৈঃ ॥ ২৯॥

ভক্ত্যা সমস্তৈস্ত্রিদশৈর্দিব্যৈর্ধূপৈঃ সুধূপিতা ।

প্রাহ প্রসাদসুমুখী সমস্তান্ প্রণতান্ সুরান্ ॥ ৩০॥

দেব্যুবাচ ॥ ৩১॥

ব্রিযতাং ত্রিদশাঃ সর্বে যদস্মত্তোঽভিবাঞ্ছিতম্ ॥ ৩২ ॥

দেবা ঊচুঃ ॥ ৩৩॥

ভগবত্যা কৃতং সর্বং ন কিংচিদবশিষ্যতে ॥ ৩৪ ॥

যদযং নিহতঃ শত্রুরস্মাকং মহিষাসুরঃ ।

যদি চাপি বরো দেযস্ত্বযাস্মাকং মহেশ্বরি ॥ ৩৫॥

সংস্মৃতা সংস্মৃতা ত্বং নো হিংসেথাঃ পরমাপদঃ ।

যশ্চ ম{ত্য}।র্ঃ স্তবৈরেভিস্ত্বাং স্তোষ্যত্যমলাননে ॥ ৩৬॥

তস্য বিত্ত{দ্ধি}।র্বিভবৈর্ধনদারাদিসম্পদাম্ ।

বৃদ্ধয়েঽস্মৎপ্রসন্না ত্বং ভবেথাঃ সর্বদাম্বিকে ॥ ৩৭॥

ঋষিরুবাচ ॥ ৩৮॥

ইতি প্রসাদিতা দেবৈর্জগতোঽর্থে তথাত্মনঃ ।

তথেত্যুক্ত্বা ভদ্রকালী বভূবান্তর্হিতা নৃপ ॥ ৩৯॥

ইত্যেতৎকথিতং ভূপ সম্ভূতা সা যথা পুরা ।

দেবী দেবশরীরেভ্যো জগত্ত্রয়হিতৈষিণী ॥ ৪০॥

পুনশ্চ গৌরীদেহাৎসা সমুদ্ভূতা যথাভবত্ ।

বধায় দুষ্টদৈত্যানাং তথা শুম্ভনিশুম্ভয়োঃ ॥ ৪১॥

রক্ষণায় চ লোকানাং দেবানামুপকারিণী ।

তচ্ছৃণুষ্ব ময়াখ্যাতং যথাবৎকথয়ামি তে ॥ ৪২॥

। হ্রীং ওঁ ।

॥ স্বস্তি শ্রীমার্কণ্ডেয়পুরাণে সাবর্ণিকে মন্বন্তরে

শক্রাদিস্তুতির্নাম চতুর্থোঽধ্যায়ঃ ॥ ৪॥

॥ পঞ্চমোঽধ্যায়ঃ ॥

বিনিয়োগঃ

অস্য শ্রী উত্তরচরিত্রস্য রুদ্র ঋষিঃ ।

শ্রীমহাসরস্বতী দেবতা ।

অনুষ্টুপ্ ছন্দঃ । ভীমা শক্তিঃ । ভ্রামরী বীজম্ ।

সূর্যস্তত্ত্বম্ ।

সামবেদঃ স্বরূপম্ । শ্রীমহাসরস্বতীপ্রীত্যর্থে

উত্তরচরিত্রপাঠে

বিনিয়োগঃ ।

ধ্যানম্

ঘণ্টাশূলহলানি শঙ্খমুসলে চক্রং ধনুঃ সাযকং

হস্তাব্জৈর্দধতীং ঘনান্তবিলসচ্ছীতাংশুতুল্যপ্রভাম্ ।

গৌরীদেহসমুদ্ভবাং ত্রিজগতামাধারভূতাং মহা-

পূর্বামত্র সরস্বতীমনুভজে শুম্ভাদিদৈত্যার্দিনীম্ ॥

ওঁ ক্লীং ঋষিরুবাচ ॥ ১॥

পুরা শুম্ভনিশুম্ভাভ্যামসুরাভ্যাং শচীপতেঃ ।

ত্রৈলোক্যং যজ্ঞভাগাশ্চ হৃতা মদবলাশ্রযাত্ ॥ ২॥

তাবেব সূর্যতাং তদ্বদধিকারং তথৈন্দবম্ ।

কৌবেরমথ যাম্যং চ চক্রাতে বরুণস্য চ ॥ ৩॥

তাবেব পবনর্দ্ধিং চ চক্রতুর্বহ্নিকর্ম চ ।

ততো দেবা বিনির্ধূতা ভ্রষ্টরাজ্যাঃ পরাজিতাঃ ॥ ৪॥

হৃতাধিকারাস্ত্রিদশাস্তাভ্যাং সর্বে নিরাকৃতাঃ ।

মহাসুরাভ্যাং তাং দেবীং সংস্মরন্ত্যপরাজিতাম্ ॥ ৫॥

তযাস্মাকং বরো দত্তো যথাপৎসু স্মৃতাখিলাঃ ।

ভবতাং নাশযিষ্যামি তৎক্ষণাৎপরমাপদঃ ॥ ৬॥

ইতি কৃত্বা মতিং দেবা হিমবন্তং নগেশ্বরম্ ।

জগ্মুস্তত্র ততো দেবীং বিষ্ণুমাযাং প্রতুষ্টুবুঃ ॥ ৭॥

দেবা ঊচুঃ ॥ ৮॥

নমো দেব্যৈ মহাদেব্যৈ শিবাযৈ সততং নমঃ ।

নমঃ প্রকৃত্যৈ ভদ্রাযৈ নিযতাঃ প্রণতাঃ স্ম তাম্ ॥ ৯॥

রৌদ্রায়ৈ নমো নিত্যায়ৈ গৌর্যৈ ধাত্র্যৈ নমো নমঃ।

জ্যোৎস্নায়ৈ চেন্দুরূপিণ্যৈ সুখায়ৈ সততং নমঃ॥ ১০॥

কল্যাণ্যৈ প্রণতা বৃদ্ধ্যৈ সিদ্ধ্যৈ কুর্মো নমো নমঃ।

নৈরৃত্যৈ ভূভৃতাং লক্ষ্ম্যৈ শর্বাণ্যৈ তে নমো নমঃ॥ ১১॥

দুর্গায়ৈ দুর্গপারায়ৈ সারায়ৈ সর্বকারিণ্যৈ।

খ্যাত্যৈ তথৈব কৃষ্ণায়ৈ ধূম্রায়ৈ সততং নমঃ॥ ১২॥

অতিসৌম্যাতিরৌদ্রায়ৈ নতাস্তস্যৈ নমো নমঃ।

নমো জগৎপ্রতিষ্ঠায়ৈ দেব্যৈ কৃত্যৈ নমো নমঃ॥ ১৩॥

যা দেবী সর্বভূতেষু বিষ্ণুমায়েতি শব্দিতা।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ॥ ১৪-১৬॥

যা দেবী সর্বভূতেষু চেতনেত্যভিধীয়তে।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ॥ ১৭-১৯॥

যা দেবী সর্বভূতেষু বুদ্ধিরূপেণ সংস্থিতা।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ॥ ২০-২২॥

যা দেবী সর্বভূতেষু নিদ্রারূপেণ সংস্থিতা।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ ॥ ২৩-২৫॥

যা দেবী সর্বভূতেষু ক্ষুধারূপেণ সংস্থিতা ।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ ॥ ২৬-২৮॥

যা দেবী সর্বভূতেষু ছাযারূপেণ সংস্থিতা ।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ ॥ ২৯-৩১॥

যা দেবী সর্বভূতেষু শক্তিরূপেণ সংস্থিতা ।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ ॥ ৩২-৩৪॥

যা দেবী সর্বভূতেষু তৃষ্ণারূপেণ সংস্থিতা ।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ ॥ ৩৫-৩৭॥

যা দেবী সর্বভূতেষু ক্ষান্তিরূপেণ সংস্থিতা ।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ ॥ ৩৮-৪০॥

যা দেবী সর্বভূতেষু জাতিরূপেণ সংস্থিতা ।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ ॥ ৪১-৪৩॥

যা দেবী সর্বভূতেষু লজ্জারূপেণ সংস্থিতা ।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ ॥ ৪৪-৪৬॥

যা দেবী সর্বভূতেষু শান্তিরূপেণ সংস্থিতা ।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ ॥ ৪৭-৪৯॥

যা দেবী সর্বভূতেষু শ্রদ্ধারূপেণ সংস্থিতা ।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ ॥ ৫০-৫২॥

যা দেবী সর্বভূতেষু কান্তিরূপেণ সংস্থিতা ।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ ॥ ৫৩-৫৫॥

যা দেবী সর্বভূতেষু লক্ষ্মীরূপেণ সংস্থিতা ।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ ॥ ৫৬-৫৮॥

যা দেবী সর্বভূতেষু বৃত্তিরূপেণ সংস্থিতা ।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ ॥ ৫৯-৬১॥

যা দেবী সর্বভূতেষু স্মৃতিরূপেণ সংস্থিতা ।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ ॥ ৬২-৬৪॥

যা দেবী সর্বভূতেষু দয়ারূপেণ সংস্থিতা ।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ ॥ ৬৫-৬৭॥

যা দেবী সর্বভূতেষু তুষ্টিরূপেণ সংস্থিতা ।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ ॥ ৬৮-৭০॥

যা দেবী সর্বভূতেষু মাতৃরূপেণ সংস্থিতা ।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ ॥ ৭১-৭৩॥

যা দেবী সর্বভূতেষু ভ্রান্তিরূপেণ সংস্থিতা ।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ ॥ ৭৪-৭৬॥

ইন্দ্রিযাণামধিষ্ঠাত্রী ভূতানাং চাখিলেষু যা ।

ভূতেষু সততং তস্যৈ ব্যাপ্ত্যৈ দেব্যৈ নমো নমঃ ॥ ৭৭॥

চিতিরূপেণ যা কৃৎস্নমেতদ্ ব্যাপ্য স্থিতা জগত্ ।

নমস্তস্যৈ নমস্তস্যৈ নমস্তস্যৈ নমো নমঃ ॥ ৭৮-৮০॥

স্তুতা সুরৈঃ পূর্বমভীষ্টসংশ্রযা-

ত্তথা সুরেন্দ্রেণ দিনেষু সেবিতা ।

করোতু সা নঃ শুভহেতুরীশ্বরী

শুভানি ভদ্রাণ্যভিহন্তু চাপদঃ ॥ ৮১॥

যা সাম্প্রতং চোদ্ধতদৈত্যতাপিতৈ-

রস্মাভিরীশা চ সুরৈর্নমস্যতে ।

যা চ স্মৃতা তৎক্ষণমেব হন্তি নঃ

সর্বাপদো ভক্তিবিনম্রমূর্তিভিঃ ॥ ৮২॥

ঋষিরুবাচ ॥ ৮৩॥

এবং স্তবাভিযুক্তানাং দেবানাং তত্র পার্বতী ।
স্নাতুমভ্যাযযৌ তোযে জাহ্নব্যা নৃপনন্দন ॥ ৮৪॥

সাব্রবীত্তান্ সুরান্ সুভ্রূর্ভবদ্ভিঃ স্তূযতেঽত্র কা ।
শরীরকোশতশ্চাস্যাঃ সমুদ্ভূতাব্রবীচ্ছিবা ॥ ৮৫॥

স্তোত্রং মমৈতৎক্রিযতে শুম্ভদৈত্যনিরাকৃতৈঃ ।
দেবৈঃ সমেতৈঃ সমরে নিশুম্ভেন পরাজিতৈঃ ॥ ৮৬॥

শরীরকোশাদ্যত্তস্যাঃ পার্বত্যা নিঃসৃতাম্বিকা ।
কৌশিকীতি সমস্তেষু ততো লোকেষু গীযতে ॥ ৮৭॥

তস্যাং বিনির্গতাযাং তু কৃষ্ণাভূৎসাপি পার্বতী ।
কালিকেতি সমাখ্যাতা হিমাচলকৃতাশ্রযা ॥ ৮৮॥

ততোঽম্বিকাং পরং রূপং বিভ্রাণাং সুমনোহরম্ ।
দদর্শ চণ্ডো মুণ্ডশ্চ ভৃত্যৌ শুম্ভনিশুম্ভযোঃ ॥ ৮৯॥

তাভ্যাং শুম্ভায চাখ্যাতা সাতীব সুমনোহরা ।
কাপ্যাস্তে স্ত্রী মহারাজ ভাসযন্তী হিমাচলম্ ॥ ৯০॥

নৈব তাদৃক্ ক্বচিদ্রূপং দৃষ্টং কেনচিদুত্তমম্ ।
জ্ঞাযতাং কাপ্যসৌ দেবী গৃহ্যতাং চাসুরেশ্বর ॥ ৯১॥

স্ত্রীরত্নমতিচার্বঙ্গী দ্যোতযন্তী দিশস্ত্বিষা ।
সা তু তিষ্ঠতি দৈত্যেন্দ্র তাং ভবান্ দ্রষ্টুমর্হতি ॥ ৯২॥

যানি রত্নানি মণযো গজাশ্বাদীনি বৈ প্রভো ।
ত্রৈলোক্যে তু সমস্তানি সাম্প্রতং ভান্তি তে গৃহে ॥ ৯৩॥

ঐরাবতঃ সমানীতো গজরত্নং পুরন্দরাত্ ।
পারিজাততরুশ্চাযং তথৈবোচ্চৈঃশ্রবা হযঃ ॥ ৯৪॥

বিমানং হংসসংযুক্তমেতত্তিষ্ঠতি তেঽঙ্গণে ।
রত্নভূতমিহানীতং যদাসীদ্বেধসোঽদ্ভুতম্ ॥ ৯৫॥

নিধিরেষ মহাপদ্মঃ সমানীতো ধনেশ্বরাত্ ।
কিঞ্জল্কিনীং দদৌ চাব্ধির্মালামম্লানপঙ্ককজাম্ ॥ ৯৬॥

ছত্রং তে বারুণং গেহে কাঞ্চনস্রাবি তিষ্ঠতি ।

তথাযং স্যন্দনবরো যঃ পুরাসীৎপ্রজাপতেঃ ॥ ৯৭॥

মৃত্যোরুৎক্রান্তিদা নাম শক্তিরীশ ত্বযা হৃতা ।

পাশঃ সলিলরাজস্য ভ্রাতুস্তব পরিগ্রহে ॥ ৯৮॥

নিশুম্ভস্যাব্ধিজাতাশ্চ সমস্তা রত্নজাতযঃ ।

বহ্নিরপি দদৌ তুভ্যমগ্নিশৌচে চ বাসসী ॥ ৯৯॥

এবং দৈত্যেন্দ্র রত্নানি সমস্তান্যাহৃতানি তে ।

স্ত্রীরত্নমেষা কল্যাণী ত্বযা কস্মান্ন গৃহ্যতে ॥ ১০০॥

ঋষিরুবাচ ॥ ১০১॥

নিশম্যেতি বচঃ শুম্ভঃ স তদা চণ্ডমুণ্ডযোঃ ।

প্রেষযামাস সুগ্রীবং দূতং দেব্যা মহাসুরম্ ॥ ১০২॥

ইতি চেতি চ বক্তব্যা সা গত্বা বচনান্মম ।

যথা চাভ্যেতি সম্প্রীত্যা তথা কার্যং ত্বযা লঘু ॥ ১০৩॥

স তত্র গত্বা যত্রাস্তে শৈলোদ্দেশেঽতিশোভনে ।

তাং চ দেবীং ততঃ প্রাহ শ্লক্ষ্ণং মধুরযা গিরা ॥ ১০৪॥

দূত উবাচ ॥ ১০৫॥

দেবি দৈত্যেশ্বরঃ শুম্ভস্ত্রৈলোক্যে পরমেশ্বরঃ ।

দূতোঽহং প্রেষিতস্তেন ত্বৎসকাশমিহাগতঃ ॥ ১০৬॥

অব্যাহতাজ্ঞঃ সর্বাসু যঃ সদা দেবযোনিষু ।

নির্জিতাখিলদৈত্যারিঃ স যদাহ শৃণুষ্ব তৎ ॥ ১০৭॥

মম ত্রৈলোক্যমখিলং মম দেবা বশানুগাঃ ।

যজ্ঞভাগানহং সর্বানুপাশ্নামি পৃথক্ পৃথক্ ॥ ১০৮॥

ত্রৈলোক্যে বররত্নানি মম বশ্যান্যশেষতঃ ।

তথৈব গজরত্নং চ হৃতং দেবেন্দ্রবাহনম্ ॥ ১০৯॥

ক্ষীরোদমথনোদ্ভূতমশ্বরত্নং মমামরৈঃ ।

উচ্চৈঃশ্রবসসংজ্ঞং তৎপ্রণিপত্য সমর্পিতম্ ॥ ১১০॥

যানি চান্যানি দেবেষু গন্ধর্বেষূরগেষু চ ।

রত্নভূতানি ভূতানি তানি ময্যেব শোভনে ॥ ১১১॥

স্ত্রীরত্নভূতাং ত্বাং দেবি লোকে মন্যামহে বযম্ ।

সা ত্বমস্মানুপাগচ্ছ যতো রত্নভুজো বযম্ ॥ ১১২॥

মাং বা মমানুজং বাপি নিশুম্ভমুরুবিক্রমম্ ।

ভজ ত্বং চঞ্চলাপাঙ্গি রত্নভূতাসি বৈ যতঃ ॥ ১১৩॥

পরমৈশ্বর্যমতুলং প্রাপ্স্যসে মৎপরিগ্রহাত্ ।

এতদ্বুদ্ধ্যা সমালোচ্য মৎপরিগ্রহতাং ব্রজ ॥ ১১৪॥

ঋষিরুবাচ ॥ ১১৫॥

ইত্যুক্তা সা তদা দেবী গম্ভীরান্তঃস্মিতা জগৌ ।

দুর্গা ভগবতী ভদ্রা যযেদং ধার্যতে জগত্ ॥ ১১৬॥

দেব্যুবাচ ॥ ১১৭॥

সত্যমুক্তং ত্বয়া নাত্র মিথ্যা কিংচিত্ত্বয়োদিতম্ ।

ত্রৈলোক্যাধিপতিঃ শুম্ভো নিশুম্ভশ্চাপি তাদৃশঃ ॥ ১১৮॥

কিং ত্বত্র যৎপ্রতিজ্ঞাতং মিথ্যা তৎক্রিযতে কথম্ ।

শ্রূযতামল্পবুদ্ধিত্বাৎপ্রতিজ্ঞা যা কৃতা পুরা ॥ ১১৯॥

যো মাং জযতি সংগ্রামে যো মে দর্পং ব্যপোহতি ।

যো মে প্রতিবলো লোকে স মে ভর্তা ভবিষ্যতি ॥ ১২০॥

তদাগচ্ছতু শুম্ভোঽত্র নিশুম্ভো বা মহাবলঃ ।

মাং জিত্বা কিং চিরেণাত্র পাণিং গৃহ্ণাতু মে লঘু ॥ ১২১॥

দূত উবাচ ॥ ১২২॥

অবলিপ্তাসি মৈবং ত্বং দেবি ব্রূহি মমাগ্রতঃ ।

ত্রৈলোক্যে কঃ পুমাংস্তিষ্ঠেদগ্রে শুম্ভনিশুম্ভয়োঃ ॥ ১২৩॥

অন্যেষামপি দৈত্যানাং সর্বে দেবা ন বৈ যুধি ।

তিষ্ঠন্তি সম্মুখে দেবি কিং পুনঃ স্ত্রী ত্বমেকিকা ॥ ১২৪॥

ইন্দ্রাদ্যাঃ সকলা দেবাস্তস্থুর্যেষাং ন সংযুগে ।

শুম্ভাদীনাং কথং তেষাং স্ত্রী প্রযাস্যসি সম্মুখম্ ॥ ১২৫॥

সা ত্বং গচ্ছ ময়ৈবোক্তা পার্শ্বং শুম্ভনিশুম্ভয়োঃ ।

কেশাকর্ষণনির্ধূতগৌরবা মা গমিষ্যসি ॥ ১২৬॥

দেব্যুবাচ ॥ ১২৭॥

এবমেতদ্ বলী শুম্ভো নিশুম্ভশ্চাপিতাদৃশঃ ।

কিং করোমি প্রতিজ্ঞা মে যদনালোচিতা পুরা ॥ ১২৮॥

স ত্বং গচ্ছ ময়োক্তং তে যদেতৎসর্বমাদৃতঃ ।

তদাচক্ষ্বাসুরেন্দ্রায় স চ যুক্তং করোতু যত্ ॥ ১২৯॥

॥ স্বস্তি শ্রীমার্কণ্ডেয়পুরাণে সাবর্ণিকে মন্বন্তরে দেবীমাহাত্ম্যে

দেব্যা দূতসংবাদো নাম পঞ্চমোঽধ্যায়ঃ ॥ ৫॥

॥ ষষ্ঠোঽধ্যায়ঃ ॥

ॐ ঋষিরুবাচ ॥ ১॥

ইত্যাকর্ণ্য বচো দেব্যাঃ স দূতোঽমর্ষপূরিতঃ ।

সমাচষ্ট সমাগম্য দৈত্যরাজায় বিস্তরাত্ ॥ ২॥

তস্য দূতস্য তদ্বাক্যমাকর্ণ্যাসুররাট্ ততঃ ।

সক্রোধঃ প্রাহ দৈত্যানামধিপং ধূম্রলোচনম্ ॥ ৩॥

হে ধূম্রলোচনাশু ত্বং স্বসৈন্যপরিবারিতঃ ।

তামানয় বলাদ্দুষ্টাং কেশাকর্ষণবিহ্বলাম্ ॥ ৪॥

তৎপরিত্রাণদঃ কশ্চিদ্যদি বোত্তিষ্ঠতেঽপরঃ ।

স হন্তব্যোঽমরো বাপি যক্ষো গন্ধর্ব এব বা ॥ ৫॥

ঋষিরুবাচ ॥ ৬॥

তেনাজ্ঞপ্তস্ততঃ শীঘ্রং স দৈত্যো ধূম্রলোচনঃ ।

বৃতঃ ষষ্ট্যা সহস্রাণামসুরাণাং দ্রুতং যযৌ ॥ ৭॥

স দৃষ্ট্বা তাং ততো দেবীং তুহিনাচলসংস্থিতাম্ ।

জগাদোচ্চৈঃ প্রযাহীতি মূলং শুম্ভনিশুম্ভযোঃ ॥ ৮॥

ন চেৎপ্রীত্যাদ্য ভবতী মদ্ভর্তারমুপৈষ্যতি ।

ততো বলান্নযাম্যেষ কেশাকর্ষণবিহ্বলাম্ ॥ ৯॥

দেব্যুবাচ ॥ ১০॥

দৈত্যেশ্বরেণ প্রহিতো বলবান্বলসংবৃতঃ ।

বলান্নযসি মামেবং ততঃ কিং তে করোম্যহম্ ॥ ১১॥

ঋষিরুবাচ ॥ ১২॥

ইত্যুক্তঃ সোঽভ্যধাবত্তামসুরো ধূম্রলোচনঃ ।

হুংকারেণৈব তং ভস্ম সা চকারাম্বিকা তদা ॥ ১৩॥

অথ ক্রুদ্ধং মহাসৈন্যমসুরাণাং তথাম্বিকা ।

ববর্ষ সাযকৈস্তীক্ষ্ণৈস্তথা শক্তিপরশ্বধৈঃ ॥ ১৪॥

ততো ধুতসটঃ কোপাৎকৃত্বা নাদং সুভৈরবম্ ।

পপাতাসুরসেনাযাং সিংহো দেব্যাঃ স্ববাহনঃ ॥ ১৫॥

কাংশ্চিৎকরপ্রহারেণ দৈত্যানাস্যেন চাপরান্ ।

আক্রান্ত্যা চাধরেণান্যান্ জঘান স মহাসুরান্ ॥ ১৬॥

কেষাংচিৎপাটযামাস নখৈঃ কোষ্ঠানি কেসরী ।

তথা তলপ্রহারেণ শিরাংসি কৃতবান্পৃথক্ ॥ ১৭॥

বিচ্ছিন্নবাহুশিরসঃ কৃতাস্তেন তথাপরে ।

পপৌ চ রুধিরং কোষ্ঠাদন্যেষাং ধুতকেসরঃ ॥ ১৮॥

ক্ষণেন তদ্বলং সর্বং ক্ষযং নীতং মহাত্মনা ।

তেন কেসরিণা দেব্যা বাহনেনাতিকোপিনা ॥ ১৯॥

শ্রুত্বা তমসুরং দেব্যা নিহতং ধূম্রলোচনম্ ।

বলং চ ক্ষযিতং কৃৎস্নং দেবীকেসরিণা ততঃ ॥ ২০॥

চুকোপ দৈত্যাধিপতিঃ শুম্ভঃ প্রস্ফুরিতাধরঃ ।

আজ্ঞাপযামাস চ তৌ চণ্ডমুণ্ডৌ মহাসুরৌ ॥ ২১॥

হে চণ্ড হে মুণ্ড বলৈর্বহুভিঃ পরিবারিতৌ ।

তত্র গচ্ছত গত্বা চ সা সমানীয়তাং লঘু ॥ ২২॥

কেশেষ্বাকৃষ্য বদ্ধ্বা বা যদি বঃ সংশযো যুধি ।

তদাশেষাযুধৈঃ সর্বৈরসুরৈর্বিনিহন্যতাম্ ॥ ২৩॥

তস্যাং হতাযাং দুষ্টাযাং সিংহে চ বিনিপাতিতে ।

শীঘ্রমাগম্যতাং বদ্ধ্বা গৃহীত্বা তামথাম্বিকাম্ ॥ ২৪॥

॥ স্বস্তি শ্রীমার্কণ্ডেযপুরাণে সাবর্ণিকে মন্বন্তরে দেবীমাহাত্ম্যে

শুম্ভনিশুম্ভসেনানীধূম্রলোচনবধো নাম ষষ্ঠোঽধ্যাযঃ ॥ ৬॥

॥ সপ্তমোঽধ্যাযঃ ॥

ওঁ ঋষিরুবাচ ॥ ১॥

আজ্ঞপ্তাস্তে ততো দৈত্যাশ্চণ্ডমুণ্ডপুরোগমাঃ ।

চতুরঙ্গবলোপেতা যযুরভ্যুদ্যতাযুধাঃ ॥ ২॥

দদৃশুস্তে ততো দেবীমীষদ্ধাসাং ব্যবস্থিতাম্ ।

সিংহস্যোপরি শৈলেন্দ্রশৃঙ্গে মহতি কাঞ্চনে ॥ ৩॥

তে দৃষ্ট্বা তাং সমাদাতুমুদ্যমং চক্রুরুদ্যতাঃ ।

আকৃষ্টচাপাসিধরাস্তথান্যে তৎসমীপগাঃ ॥ ৪॥

ততঃ কোপং চকারোচ্চৈরম্বিকা তানরীন্প্রতি ।

কোপেন চাস্যা বদনং মষীবর্ণমভূত্তদা ॥ ৫॥

ভ্রুকুটীকুটিলাত্তস্যা ললাটফলকাদ্দ্রুতম্ ।

কালী করালবদনা বিনিষ্ক্রান্তাসিপাশিনী ॥ ৬॥

বিচিত্রখট্বাঙ্গধরা নরমালাবিভূষণা ।

দ্বীপিচর্মপরীধানা শুষ্কমাংসাতিভৈরবা ॥ ৭॥

অতিবিস্তারবদনা জিহ্বাললনভীষণা ।

নিমগ্নারক্তনযনা নাদাপূরিতদিঙ্মুখা ॥ ৮॥

সা বেগেনাভিপতিতা ঘাতযন্তী মহাসুরান্ ।

সৈন্যে তত্র সুরারীণামভক্ষযত তদ্বলম্ ॥ ৯॥

পার্ষ্ণিগ্রাহাঙ্কুশগ্রাহযোধঘণ্টাসমন্বিতান্ ।

সমাদাযৈকহস্তেন মুখে চিক্ষেপ বারণান্ ॥ ১০॥

তথৈব যোধং তুরগৈ রথং সারথিনা সহ ।

নিক্ষিপ্য বক্ত্রে দশনৈশ্চর্বযন্ত্যতিভৈরবম্ ॥ ১১॥

একং জগ্রাহ কেশেষু গ্রীবাযামথ চাপরম্ ।

পাদেনাক্রম্য চৈবান্যমুরসান্যমপোথযত্ ॥ ১২॥

তৈর্মুক্তানি চ শস্ত্রাণি মহাস্ত্রাণি তথাসুরৈঃ ।

মুখেন জগ্রাহ রুষা দশনৈর্মথিতান্যপি ॥ ১৩॥

বলিনাং তদ্বলং সর্বমসুরাণাং দুরাত্মনাম্ ।

মমর্দাভক্ষযচ্চান্যানন্যাংশ্চাতাডযত্তদা ॥ ১৪॥

অসিনা নিহতাঃ কেচিত্কেচিত্খট্বাঙ্গতাডিতাঃ ।

জগ্মুর্বিনাশমসুরা দন্তাগ্রাভিহতাস্তথা ॥ ১৫॥

ক্ষণেন তদ্বলং সর্বমসুরাণাং নিপাতিতম্ ।

দৃষ্ট্বা চণ্ডোঽভিদুদ্রাব তাং কালীমতিভীষণাম্ ॥ ১৬॥

শরবর্ষৈর্মহাভীমৈর্ভীমাক্ষীং তাং মহাসুরঃ ।

ছাদযামাস চক্রৈশ্চ মুণ্ডঃ ক্ষিপ্তৈঃ সহস্রশঃ ॥ ১৭॥

তানি চক্রাণ্যনেকানি বিশমানানি তন্মুখম্ ।

বভুর্যথার্কবিম্বানি সুবহূনি ঘনোদরম্ ॥ ১৮॥

ততো জহাসাতিরুষা ভীমং ভৈরবনাদিনী ।

কালী করালবদনা দুর্দর্শদশনোজ্জ্বলা ॥ ১৯॥

উত্থায চ মহাসিংহং দেবী চণ্ডমধাবত ।

গৃহীত্বা চাস্য কেশেষু শিরস্তেনাসিনাচ্ছিনত্ ॥ ২০॥

অথ মুণ্ডোঽভ্যধাবত্তাং দৃষ্ট্বা চণ্ডং নিপাতিতম্ ।

তমপ্যপাতযদ্ভূমৌ সা খড্গাভিহতং রুষা ॥ ২১॥

হতশেষং ততঃ সৈন্যং দৃষ্ট্বা চণ্ডং নিপাতিতম্ ।

মুণ্ডং চ সুমহাবীর্যং দিশো ভেজে ভযাতুরম্ ॥ ২২॥

শিরশ্চণ্ডস্য কালী চ গৃহীত্বা মুণ্ডমেব চ ।

প্রাহ প্রচণ্ডাট্টহাসমিশ্রমভ্যেত্য চণ্ডিকাম্ ॥ ২৩॥

মযা তবাত্রোপহৃতৌ চণ্ডমুণ্ডৌ মহাপশূ ।

যুদ্ধযজ্ঞে স্বযং শুম্ভং নিশুম্ভং চ হনিষ্যসি ॥ ২৪॥

ঋষিরুবাচ ॥ ২৫॥

তাবানীতৌ ততো দৃষ্ট্বা চণ্ডমুণ্ডৌ মহাসুরৌ ।

উবাচ কালীং কল্যাণী ললিতং চণ্ডিকা বচঃ ॥ ২৬॥

যস্মাচ্চণ্ডং চ মুণ্ডং চ গৃহীত্বা ত্বমুপাগতা ।

চামুণ্ডেতি ততো লোকে খ্যাতা দেবী ভবিষ্যসি ॥ ২৭॥

॥ স্বস্তি শ্রীমার্কণ্ডেয়পুরাণে সাবর্ণিকে মন্বন্তরে দেবীমাহাত্ম্যে

চণ্ডমুণ্ডবধো নাম সপ্তমোঽধ্যায়ঃ ॥ ৭॥

॥ অষ্টমোঽধ্যায়ঃ ॥

ॐ ঋষিরুবাচ ॥ ১॥

চণ্ডে চ নিহতে দৈত্যে মুণ্ডে চ বিনিপাতিতে ।

বহুলেষু চ সৈন্যেষু ক্ষয়িতেষ্বসুরেশ্বরঃ ॥ ২॥

ততঃ কোপপরাধীনচেতাঃ শুম্ভঃ প্রতাপবান্ ।

উদ্যোগং সর্বসৈন্যানাং দৈত্যানামাদিদেশ হ ॥ ৩॥

অদ্য সর্ববলৈর্দৈত্যাঃ ষডশীতিরুদায়ুধাঃ ।

কম্বূনাং চতুরশীতির্নির্যান্তু স্ববলৈর্বৃতাঃ ॥ ৪॥

কোটিবীর্যাণি পঞ্চাশদসুরাণাং কুলানি বৈ ।

শতং কুলানি ধৌম্রাণাং নির্গচ্ছন্তু মমাজ্ঞয়া ॥ ৫॥

কালকা দৌর্হৃদা মৌর্বাঃ কালিকেযাস্তথাসুরাঃ ।

যুদ্ধায সজ্জা নির্যান্তু আজ্ঞযা ত্বরিতা মম ॥ ৬॥

ইত্যাজ্ঞাপ্যাসুরপতিঃ শুম্ভো ভৈরবশাসনঃ ।

নির্জগাম মহাসৈন্যসহস্রৈর্বহুভির্বৃতঃ ॥ ৭॥

আযান্তং চণ্ডিকা দৃষ্ট্বা তৎসৈন্যমতিভীষণম্ ।

জ্যাস্বনৈঃ পূরযামাস ধরণীগগনান্তরম্ ॥ ৮॥

ততঃ সিংহো মহানাদমতীব কৃতবান্নৃপ ।

ঘণ্টাস্বনেন তান্নাদানম্বিকা চোপবৃংহযত্ ॥ ৯॥

ধনুর্জ্যাসিংহঘণ্টানাং নাদাপূরিতদিঙ্মুখা ।

নিনাদৈর্ভীষণৈঃ কালী জিগ্যে বিস্তারিতাননা ॥ ১০॥

তং নিনাদমুপশ্রুত্য দৈত্যসৈন্যৈশ্চতুর্দিশম্ ।

দেবী সিংহস্তথা কালী সরোষৈঃ পরিবারিতাঃ ॥ ১১॥

এতস্মিন্নন্তরে ভূপ বিনাশায সুরদ্বিষাম্ ।

ভবাযামরসিংহানামতিবীর্যবলান্বিতাঃ ॥ ১২॥

ব্রহ্মেশগুহবিষ্ণূনাং তথেন্দ্রস্য চ শক্তযঃ ।

শরীরেভ্যো বিনিষ্ক্রম্য তদ্রূপৈশ্চণ্ডিকাং যযুঃ ॥ ১৩॥

যস্য দেবস্য যদ্রূপং যথা ভূষণবাহনম্ ।

তদ্বদেব হি তচ্ছক্তিরসুরান্যোদ্ধুমাযযৌ ॥ ১৪॥

হংসযুক্তবিমানাগ্রে সাক্ষসূত্রকমণ্ডলুঃ ।

আযাতা ব্রহ্মণঃ শক্তির্ব্রহ্মাণীত্যভিধীযতে ॥ ১৫॥

মাহেশ্বরী বৃষারূঢা ত্রিশূলবরধারিণী ।

মহাহিবলযা প্রাপ্তা চন্দ্ররেখাবিভূষণা ॥ ১৬॥

কৌমারী শক্তিহস্তা চ মযূরবরবাহনা ।

যোদ্ধুমভ্যাযযৌ দৈত্যানম্বিকা গুহরূপিণী ॥ ১৭॥

তথৈব বৈষ্ণবী শক্তির্গরুডোপরি সংস্থিতা ।

শঙ্খচক্রগদাশার্ঙ্গখড্গহস্তাভ্যুপাযযৌ ॥ ১৮॥

যজ্ঞবারাহমতুলং রূপং যা বিভ্রতো হরেঃ ।

শক্তিঃ সাপ্যাযযৌ তত্র বারাহীং বিভ্রতী তনুম্ ॥ ১৯॥

নারসিংহী নৃসিংহস্য বিভ্রতী সদৃশং বপুঃ ।

প্রাপ্তা তত্র সটাক্ষেপক্ষিপ্তনক্ষত্রসংহতিঃ ॥ ২০॥

বজ্রহস্তা তথৈবৈন্দ্রী গজরাজোপরি স্থিতা ।

প্রাপ্তা সহস্রনযনা যথা শক্রস্তথৈব সা ॥ ২১॥

ততঃ পরিবৃতস্তাভিরীশানো দেবশক্তিভিঃ ।

হন্যন্তামসুরাঃ শীঘ্রং মম প্রীত্যাহ চণ্ডিকাম্ ॥ ২২॥

ততো দেবীশরীরাত্তু বিনিষ্ক্রান্তাতিভীষণা ।

চণ্ডিকা শক্তিরত্যুগ্রা শিবাশতনিনাদিনী ॥ ২৩॥

সা চাহ ধূম্রজটিলমীশানমপরাজিতা ।

দূত ত্বং গচ্ছ ভগবন্ পার্শ্বং শুম্ভনিশুম্ভযোঃ ॥ ২৪॥

ব্রূহি শুম্ভং নিশুম্ভং চ দানবাবতিগর্বিতৌ ।

যে চান্যে দানবাস্তত্র যুদ্ধায সমুপস্থিতাঃ ॥ ২৫॥

ত্রৈলোক্যমিন্দ্রো লভতাং দেবাঃ সন্তু হবির্ভুজঃ ।

যূযং প্রযাত পাতালং যদি জীবিতুমিচ্ছথ ॥ ২৬॥

বলাবলেপাদথ চেদ্ভবন্তো যুদ্ধকাঙ্ক্ষিণঃ ।

তদাগচ্ছত তৃপ্যন্তু মচ্ছিবাঃ পিশিতেন বঃ ॥ ২৭॥

যতো নিযুক্তো দৌত্যেন তযা দেব্যা শিবঃ স্বযম্ ।

শিবদূতীতি লোকেঽস্মিংস্ততঃ সা খ্যাতিমাগতা ॥ ২৮॥

তেঽপি শ্রুত্বা বচো দেব্যাঃ শর্বাখ্যাতং মহাসুরাঃ ।

অমর্ষাপূরিতা জগ্মুর্যত্র কাত্যায়নী স্থিতা ॥ ২৯॥

ততঃ প্রথমমেবাগ্রে শরশক্ত্যৃষ্টিবৃষ্টিভিঃ ।

ববর্ষুরুদ্ধতামর্ষাস্তাং দেবীমমরারয়ঃ ॥ ৩০॥

সা চ তান্ প্রহিতান্ বাণাঞ্ছূলশক্তিপরশ্বধান্ ।

চিচ্ছেদ লীলযাধ্মাতধনুর্মুক্তৈর্মহেষুভিঃ ॥ ৩১॥

তস্যাগ্রতস্তথা কালী শূলপাতবিদারিতান্ ।

খট্বাঙ্গপোথিতাংশ্চারীন্কুর্বতী ব্যচরত্তদা ॥ ৩২॥

কমণ্ডলুজলাক্ষেপহতবীর্যান্ হতৌজসঃ ।

ব্রহ্মাণী চাকরোচ্ছত্রূন্যেন যেন স্ম ধাবতি ॥ ৩৩॥

মাহেশ্বরী ত্রিশূলেন তথা চক্রেণ বৈষ্ণবী ।

দৈত্যাঞ্জঘান কৌমারী তথা শক্ত্যাতিকোপনা ॥ ৩৪॥

ঐন্দ্রী কুলিশপাতেন শতশো দৈত্যদানবাঃ ।

পেতুর্বিদারিতাঃ পৃথ্ব্যাং রুধিরৌঘপ্রবর্ষিণঃ ॥ ৩৫॥

তুণ্ডপ্রহারবিধ্বস্তা দংষ্ট্রাগ্রক্ষতবক্ষসঃ ।
বারাহমূর্ত্যা ন্যপতংশ্চক্রেণ চ বিদারিতাঃ ॥ ৩৬॥

নখৈর্বিদারিতাংশ্চান্যান্ ভক্ষযন্তী মহাসুরান্ ।
নারসিংহী চচারাজৌ নাদাপূর্ণদিগম্বরা ॥ ৩৭॥

চণ্ডাট্টহাসৈরসুরাঃ শিবদূত্যভিদূষিতাঃ ।
পেতুঃ পৃথিব্যাং পতিতাংস্তাংশ্চখাদাথ সা তদা ॥ ৩৮॥

ইতি মাতৃগণং ক্রুদ্ধং মর্দযন্তং মহাসুরান্ ।
দৃষ্ট্বাভ্যুপাযৈর্বিবিধৈর্নেশুর্দেবারিসৈনিকাঃ ॥ ৩৯॥

পলাযনপরান্দৃষ্ট্বা দৈত্যান্মাতৃগণার্দিতান্ ।
যোদ্ধুমভ্যাযযৌ ক্রুদ্ধো রক্তবীজো মহাসুরঃ ॥ ৪০॥

রক্তবিন্দুর্যদা ভূমৌ পতত্যস্য শরীরতঃ ।
সমুৎপততি মেদিন্যাং তৎপ্রমাণো মহাসুরঃ ॥ ৪১॥

যুযুধে স গদাপাণিরিন্দ্রশক্ত্যা মহাসুরঃ ।
ততশ্চৈন্দ্রী স্ববজ্রেণ রক্তবীজমতাডযত্ ॥ ৪২॥

কুলিশেনাহতস্যাশু বহু সুস্রাব শোণিতম্ ।

সমুত্তস্থুস্ততো যোধাস্তদ্রূপাস্তৎপরাক্রমাঃ ॥ ৪৩॥

যাবন্তঃ পতিতাস্তস্য শরীরাদ্রক্তবিন্দবঃ ।

তাবন্তঃ পুরুষা জাতাস্তদ্বীর্যবলবিক্রমাঃ ॥ ৪৪॥

তে চাপি যুযুধুস্তত্র পুরুষা রক্তসম্ভবাঃ ।

সমং মাতৃভিরত্যুগ্রশস্ত্রপাতাতিভীষণম্ ॥ ৪৫॥

পুনশ্চ বজ্রপাতেন ক্ষতমস্য শিরো যদা ।

ববাহ রক্তং পুরুষাস্ততো জাতাঃ সহস্রশঃ ॥ ৪৬॥

বৈষ্ণবী সমরে চৈনং চক্রেণাভিজঘান হ ।

গদযা তাডযামাস ঐন্দ্রী তমসুরেশ্বরম্ ॥ ৪৭॥

বৈষ্ণবীচক্রভিন্নস্য রুধিরস্রাবসম্ভবৈঃ ।

সহস্রশো জগদ্ব্যাপ্তং তৎপ্রমাণৈর্মহাসুরৈঃ ॥ ৪৮॥

শক্ত্যা জঘান কৌমারী বারাহী চ তথাসিনা ।

মাহেশ্বরী ত্রিশূলেন রক্তবীজং মহাসুরম্ ॥ ৪৯॥

স চাপি গদযা দৈত্যঃ সর্বা এবাহনত্ পৃথক্ ।

মাতৃঃ কোপসমাবিষ্টো রক্তবীজো মহাসুরঃ ॥ ৫০॥

তস্যাহতস্য বহুধা শক্তিশূলাদিভির্ভুবি ।

পপাত যো বৈ রক্তৌঘস্তেনাসঞ্চতশোঽসুরাঃ ॥ ৫১॥

তৈশ্চাসুরাসৃক্সম্ভূতৈরসুরৈঃ সকলং জগত্ ।

ব্যাপ্তমাসীত্ততো দেবা ভযমাজগ্মুরুত্তমম্ ॥ ৫২॥

তান্ বিষণ্ণান্ সুরান্ দৃষ্ট্বা চণ্ডিকা প্রাহসত্বরম্ ।

উবাচ কালীং চামুণ্ডে বিস্তীর্ণং বদনং কুরু ॥ ৫৩॥

মচ্ছস্ত্রপাতসম্ভূতান্ রক্তবিন্দূন্ মহাসুরান্ ।

রক্তবিন্দোঃ প্রতীচ্ছ ত্বং বক্ত্রেণানেন বেগিনা ॥ ৫৪॥

ভক্ষযন্তী চর রণে তদুৎপন্নান্মহাসুরান্ ।

এবমেষ ক্ষযং দৈত্যঃ ক্ষেণরক্তো গমিষ্যতি ॥ ৫৫॥

ভক্ষ্যমাণাস্ত্বযা চোগ্রা ন চোৎপৎস্যন্তি চাপরে ।

ইত্যুক্ত্বা তাং ততো দেবী শূলেনাভিজঘান তম্ ॥ ৫৬॥

মুখেন কালী জগৃহে রক্তবীজস্য শোণিতম্ ।

ততোঽসাবাজঘানাথ গদযা তত্র চণ্ডিকাম্ ॥ ৫৭॥

ন চাস্যা বেদনাং চক্রে গদাপাতোঽল্পিকামপি ।

তস্যাহতস্য দেহাত্তু বহু সুস্রাব শোণিতম্ ॥ ৫৮॥

যতস্ততস্তদ্বক্ত্রেণ চামুণ্ডা সম্প্রতীচ্ছতি ।
মুখে সমুদ্গতা যেঽস্যা রক্তপাতান্মহাসুরাঃ ॥ ৫৯॥

তাংশ্চখাদাথ চামুণ্ডা পপৌ তস্য চ শোণিতম্ ।
দেবী শূলেন বজ্রেণ বাণৈরসিভির্ঋষ্টিভিঃ ॥ ৬০॥

জঘান রক্তবীজং তং চামুণ্ডাপীতশোণিতম্ ।
স পপাত মহীপৃষ্ঠে শস্ত্রসঙ্ঘসমাহতঃ ॥ ৬১॥

নীরক্তশ্চ মহীপাল রক্তবীজো মহাসুরঃ ।
ততস্তে হর্ষমতুলমবাপুস্ত্রিদশা নৃপ ॥ ৬২॥

তেষাং মাতৃগণো জাতো ননর্তাসৃঙ্মদোদ্ধতঃ ॥ ৬৩॥

॥ স্বস্তি শ্রীমার্কণ্ডেযপুরাণে সাবর্ণিকে মন্বন্তরে দেবীমাহাত্ম্যে

রক্তবীজবধো নামাষ্টমোঽধ্যাযঃ ॥ ৮॥

॥ নবমোঽধ্যাযঃ ॥

ॐ রাজোবাচ ॥ ১॥

বিচিত্রমিদমাখ্যাতং ভগবন্ ভবতা মম ।

দেব্যাশ্চরিতমাহাত্ম্যং রক্তবীজবধাশ্রিতম্ ॥ ২॥

ভূয়শ্চেচ্ছাম্যহং শ্রোতুং রক্তবীজে নিপাতিতে ।

চকার শুম্ভো যৎকর্ম নিশুম্ভশ্চাতিকোপনঃ ॥ ৩॥

ঋষিরুবাচ ॥ ৪॥

চকার কোপমতুলং রক্তবীজে নিপাতিতে ।

শুম্ভাসুরো নিশুম্ভশ্চ হতেষ্বন্যেষু চাহবে ॥ ৫॥

হন্যমানং মহাসৈন্যং বিলোক্যামর্ষমুদ্বহন্ ।

অভ্যধাবন্নিশুম্ভোঽথ মুখ্যযাসুরসেনযা ॥ ৬॥

তস্যাগ্রতস্তথা পৃষ্ঠে পার্শ্বযোশ্চ মহাসুরাঃ ।

সংদষ্টৌষ্ঠপুটাঃ ক্রুদ্ধা হন্তুং দেবীমুপাযযুঃ ॥ ৭॥

আজগাম মহাবীর্যঃ শুম্ভোঽপি স্ববলৈর্বৃতঃ ।

নিহন্তুং চণ্ডিকাং কোপাৎকৃত্বা যুদ্ধং তু মাতৃভিঃ ॥ ৮॥

ততো যুদ্ধমতীবাসীদ্দেব্যা শুম্ভনিশুম্ভযোঃ ।
শরবর্ষমতীবোগ্রং মেঘযোরিব বর্ষতোঃ ॥ ৯॥

চিচ্ছেদাস্তাঞ্ছরাংস্তাভ্যাং চণ্ডিকা স্বশরোৎকরৈঃ ।
তাডযামাস চাঙ্গেষু শস্ত্রৌঘৈরসুরেশ্বরৌ ॥ ১০॥

নিশুম্ভো নিশিতং খড্গং চর্ম চাদায সুপ্রভম্ ।
অতাডযন্মূর্ধ্নি সিংহং দেব্যা বাহনমুত্তমম্ ॥ ১১॥

তাডিতে বাহনে দেবী ক্ষুরপ্রেণাসিমুত্তমম্ ।
নিশুম্ভস্যাশু চিচ্ছেদ চর্ম চাপ্যষ্টচন্দ্রকম্ ॥ ১২॥

ছিন্নে চর্মণি খড্গে চ শক্তিং চিক্ষেপ সোঽসুরঃ ।
তামপ্যস্য দ্বিধা চক্রে চক্রেণাভিমুখাগতাম্ ॥ ১৩॥

কোপাধ্মাতো নিশুম্ভোঽথ শূলং জগ্রাহ দানবঃ ।
আযাতং মুষ্টিপাতেন দেবী তচ্চাপ্যচূর্ণযত্ ॥ ১৪॥

আবিধ্যাথ গদাং সোঽপি চিক্ষেপ চণ্ডিকাং প্রতি ।
সাপি দেব্যাস্ ত্রিশূলেন ভিন্না ভস্মত্বমাগতা ॥ ১৫॥

ততঃ পরশুহস্তং তমাযান্তং দৈত্যপুঙ্গবম্ ।

আহত্য দেবী বাণৌঘৈরপাতযত ভূতলে ॥ ১৬॥

তস্মিন্নিপতিতে ভূমৌ নিশুম্ভে ভীমবিক্রমে ।
ভ্রাতর্যতীব সংক্রুদ্ধঃ প্রযযৌ হন্তুমম্বিকাম্ ॥ ১৭॥

স রথস্থস্তথাত্যুচ্চৈর্গৃহীতপরমাযুধৈঃ ।
ভুজৈরষ্টাভিরতুলৈর্ব্যাপ্যাশেষং বভৌ নভঃ ॥ ১৮॥

তমাযান্তং সমালোক্য দেবী শঙ্খমবাদযত্ ।
জ্যাশব্দং চাপি ধনুষশ্চকারাতীব দুঃসহম্ ॥ ১৯॥

পূরযামাস ককুভো নিজঘণ্টাস্বনেন চ ।
সমস্তদৈত্যসৈন্যানাং তেজোবধবিধাযিনা ॥ ২০॥

ততঃ সিংহো মহানাদৈস্ত্যাজিতেভমহামদৈঃ ।
পূরযামাস গগনং গাং তথৈব দিশো দশ ॥ ২১॥

ততঃ কালী সমুৎপত্য গগনং ক্ষ্মামতাডযত্ ।
করাভ্যাং তন্নিনাদেন প্রাক্স্বনাস্তে তিরোহিতাঃ ॥ ২২॥

অট্টাট্টহাসমশিবং শিবদূতী চকার হ ।
বৈঃ শব্দৈরসুরাস্ত্রেসুঃ শুম্ভঃ কোপং পরং যযৌ ॥ ২৩॥

দুরাত্মংস্তিষ্ঠ তিষ্ঠেতি ব্যাজহারাম্বিকা যদা ।

তদা জয়েত্যভিহিতং দেবৈরাকাশসংস্থিতৈঃ ॥ ২৪॥

শুম্ভেনাগত্য যা শক্তির্মুক্তা জ্বালাতিভীষণা ।

আয়ান্তী বহ্নিকূটাভা সা নিরস্তা মহোল্কয়া ॥ ২৫॥

সিংহনাদেন শুম্ভস্য ব্যাপ্তং লোকত্রয়ান্তরম্ ।

নির্ঘাতনিঃস্বনো ঘোরো জিতবানবনীপতে ॥ ২৬॥

শুম্ভমুক্তাঞ্ছরান্দেবী শুম্ভস্তৎপ্রহিতাঞ্ছরান্ ।

চিচ্ছেদ স্বশরৈরুগ্রৈঃ শতশোঽথ সহস্রশঃ ॥ ২৭॥

ততঃ সা চণ্ডিকা ক্রুদ্ধা শূলেনাভিজঘান তম্ ।

স তদাভিহতো ভূমৌ মূর্চ্ছিতো নিপপাত হ ॥ ২৮॥

ততো নিশুম্ভঃ সম্প্রাপ্য চেতনামাত্তকার্মুকঃ ।

আজঘান শরৈর্দেবীং কালীং কেসরিণং তথা ॥ ২৯॥

পুনশ্চ কৃত্বা বাহূনাময়ুতং দনুজেশ্বরঃ ।

চক্রায়ুধেন দিতিজশ্ছাদয়ামাস চণ্ডিকাম্ ॥ ৩০॥

ততো ভগবতী ক্রুদ্ধা দুর্গা দুর্গার্তিনাশিনী ।

চিচ্ছেদ দেবী চক্রাণি স্বশরৈঃ সায়কাংশ্চ তান্ ॥ ৩১॥

ততো নিশুম্ভো বেগেন গদামাদায় চণ্ডিকাম্ ।

অভ্যধাবত বৈ হন্তুং দৈত্যসৈন্যসমাবৃতঃ ॥ ৩২ ॥

তস্যাপতত এবাশু গদাং চিচ্ছেদ চণ্ডিকা ।

খড্গেন শিতধারেণ স চ শূলং সমাদদে ॥ ৩৩॥

শূলহস্তং সমায়ান্তং নিশুম্ভমমরার্দনম্ ।

হৃদি বিব্যাধ শূলেন বেগাবিদ্ধেন চণ্ডিকা ॥ ৩৪ ॥

ভিন্নস্য তস্য শূলেন হৃদয়ান্নিঃসৃতোঽপরঃ ।

মহাবলো মহাবীর্যস্তিষ্ঠেতি পুরুষো বদন্ ॥ ৩৫॥

তস্য নিষ্ক্রামতো দেবী প্রহস্য স্বনবত্ততঃ ।

শিরশ্চিচ্ছেদ খড্গেন ততোঽসাবপতদ্ভুবি ॥ ৩৬॥

ততঃ সিংহশ্চখাদোগ্রদংষ্ট্রাক্ষুণ্ণশিরোধরান্ ।

অসুরাংস্তাংস্তথা কালী শিবদূতী তথাপরান্ ॥ ৩৭॥

কৌমারীশক্তিনির্ভিন্নাঃ কেচিন্নেশুর্মহাসুরাঃ ।

ব্রহ্মাণীমন্ত্রপূতেন তোয়েনান্যে নিরাকৃতাঃ ॥ ৩৮॥

মাহেশ্বরীত্রিশূলেন ভিন্নাঃ পেতুস্তথাপরে ।

বারাহীতুণ্ডঘাতেন কেচিচ্চূর্ণীকৃতা ভুবি ॥ ৩৯॥

খণ্ডং খণ্ডং চ চক্রেণ বৈষ্ণব্যা দানবাঃ কৃতাঃ ।

বজ্রেণ চৈন্দ্রীহস্তাগ্রবিমুক্তেন তথাপরে ॥ ৪০॥

কেচিদ্বিনেশুরসুরাঃ কেচিন্নষ্টা মহাহবাত্ ।

ভক্ষিতাশ্চাপরে কালীশিবদূতীমৃগাধিপৈঃ ॥ ৪১॥

॥ স্বস্তি শ্রীমার্কণ্ডেযপুরাণে সাবর্ণিকে মন্বন্তরে দেবীমাহাত্ম্যে

নিশুম্ভবধো নাম নবমোঽধ্যাযঃ ॥ ৯॥

॥ দশমোঽধ্যাযঃ ॥

ওঁ ঋষিরুবাচ ॥ ১॥

নিশুম্ভং নিহতং দৃষ্ট্বা ভ্রাতরং প্রাণসম্মিতম্ ।

হন্যমানং বলং চৈব শুম্ভঃ ক্রুদ্ধোঽব্রবীদ্বচঃ ॥ ২॥

বলাবলেপদুষ্টে ত্বং মা দুর্গে গর্বমাবহ ।

অন্যাসাং বলমাশ্রিত্য যুদ্ধ্যসে চাতিমানিনী ॥ ৩॥

দেব্যুবাচ ॥ ৪॥

একৈবাহং জগত্যত্র দ্বিতীযা কা মমাপরা ।
পশ্যৈতা দুষ্ট ময্যেব বিশন্ত্যো মদ্বিভূতযঃ ॥ ৫॥

ততঃ সমস্তাস্তা দেব্যো ব্রহ্মাণীপ্রমুখা লযম্ ।
তস্যা দেব্যাস্তনৌ জগ্মুরেকৈবাসীত্তদাম্বিকা ॥ ৬॥

দেব্যুবাচ ॥ ৭॥

অহং বিভূত্যা বহুভিরিহ রূপৈর্যদাস্থিতা ।
তৎসংহৃতং মযৈকৈব তিষ্ঠাম্যাজৌ স্থিরো ভব ॥ ৮॥

ঋষিরুবাচ ॥ ৯॥

ততঃ প্রববৃতে যুদ্ধং দেব্যাঃ শুম্ভস্য চোভযোঃ ।
পশ্যতাং সর্বদেবানামসুরাণাং চ দারুণম্ ॥ ১০॥

শরবর্ষৈঃ শিতৈঃ শস্ত্রৈস্তথা চাস্ত্রৈঃ সুদারুণৈঃ ।
তযোর্যুদ্ধমভূদ্ভূযঃ সর্বলোকভযঙ্করম্ ॥ ১১॥

দিব্যান্যস্ত্রাণি শতশো মুমুচে যান্যথাম্বিকা ।

বভঞ্জ তানি দৈত্যেন্দ্রস্তৎপ্রতীঘাতকর্তৃভিঃ ॥ ১২॥

মুক্তানি তেন চাস্ত্রাণি দিব্যানি পরমেশ্বরী ।

বভঞ্জ লীলযৈবোগ্রহুঙ্কারোচ্চারণাদিভিঃ ॥ ১৩॥

ততঃ শরশতৈর্দেবীমাচ্ছাদযত সোঽসুরঃ ।

সাপি তৎকুপিতা দেবী ধনুশ্চিচ্ছেদ চেষুভিঃ ॥ ১৪॥

ছিন্নে ধনুষি দৈত্যেন্দ্রস্তথা শক্তিমথাদদে ।

চিচ্ছেদ দেবী চক্রেণ তামপ্যস্য করে স্থিতাম্ ॥ ১৫॥

ততঃ খড্গমুপাদায শতচন্দ্রং চ ভানুমত্ ।

অভ্যধা বত তাং দেবীং দৈত্যানামধিপেশ্বরঃ ॥ ১৬॥

তস্যাপতত এবাশু খড্গং চিচ্ছেদ চণ্ডিকা ।

ধনুর্মুক্তৈঃ শিতৈর্বাণৈশ্চর্ম চার্ককরামলম্ ।

অশ্বাংশ্চ পাতযামাস রথং সারথিনা সহ ॥ ১৭॥

হতাশ্বঃ স তদা দৈত্যশ্ছিন্নধন্বা বিসারথিঃ ।

জগ্রাহ মুদ্গরং ঘোরমম্বিকানিধনোদ্যতঃ ॥ ১৮॥

চিচ্ছেদাপততস্তস্য মুদ্গরং নিশিতৈঃ শরৈঃ ।

**_Stotram Digitalized By Sanskritdocuments.org_**

তথাপি সোঽভ্যধাবত্তাং মুষ্টিমুদ্যম্য বেগবান্ ॥ ১৯॥

স মুষ্টিং পাতযামাস হৃদযে দৈত্যপুঙ্গবঃ ।
দেব্যাস্তং চাপি সা দেবী তলেনোরস্যতাডযত্ ॥ ২০॥

তলপ্রহারাভিহতো নিপপাত মহীতলে ।
স দৈত্যরাজঃ সহসা পুনরেব তথোত্থিতঃ ॥ ২১॥

উৎপত্য চ প্রগৃহ্যোচ্চৈর্দেবীং গগনমাস্থিতঃ ।
তত্রাপি সা নিরাধারা যুযুধে তেন চণ্ডিকা ॥ ২২॥

নিযুদ্ধং খে তদা দৈত্যশ্চণ্ডিকা চ পরস্পরম্ ।
চক্রতুঃ প্রথমং সিদ্ধমুনিবিস্মযকারকম্ ॥ ২৩॥

ততো নিযুদ্ধং সুচিরং কৃত্বা তেনাম্বিকা সহ ।
উৎপাট্য ভ্রামযামাস চিক্ষেপ ধরণীতলে ॥ ২৪॥

স ক্ষিপ্তো ধরণীং প্রাপ্য মুষ্টিমুদ্যম্য বেগবান্ ।
অভ্যধাবত দুষ্টাত্মা চণ্ডিকানিধনেচ্ছযা ॥ ২৫॥

তমাযান্তং ততো দেবী সর্বদৈত্যজনেশ্বরম্ ।
জগত্যাং পাতযামাস ভিত্ত্বা শূলেন বক্ষসি ॥ ২৬॥

স গতাসুঃ পপাতোর্ব্যাং দেবী শূলাগ্রবিক্ষতঃ ।

চালযন্ সকলাং পৃথ্বীং সাব্ধিদ্বীপাং সপর্বতাম্ ॥ ২৭॥

ততঃ প্রসন্নমখিলং হতে তস্মিন্ দুরাত্মনি ।

জগৎস্বাস্থ্যমতীবাপ নির্মলং চাভবন্নভঃ ॥ ২৮॥

উৎপাতমেঘাঃ সোল্কা যে প্রাগাসংস্তে শমং যযুঃ ।

সরিতো মার্গবাহিন্যস্তথাসংস্তত্র পাতিতে ॥ ২৯॥

ততো দেবগণাঃ সর্বে হর্ষনির্ভরমানসাঃ ।

বভূবুর্নিহতে তস্মিন্ গন্ধর্বা ললিতং জগুঃ ॥ ৩০॥

অবাদযংস্তথৈবান্যে ননৃতুশ্চাপ্সরোগণাঃ ।

ববুঃ পুণ্যাস্তথা বাতাঃ সুপ্রভোঽভূদ্দিবাকরঃ ॥ ৩১॥

জজ্বলুশ্চাগ্নযঃ শান্তাঃ শান্তা দিগ্জনিতস্বনাঃ ॥ ৩২॥

॥ স্বস্তি শ্রীমার্কণ্ডেযপুরাণে সাবর্ণিকে মন্বন্তরে

দেবীমাহাত্ম্যে শুম্ভবধো নাম দশমোঽধ্যাযঃ ॥ ১০॥

॥ একাদশোঽধ্যায়ঃ ॥

ওঁ ঋষিরুবাচ ॥ ১॥

দেব্যা হতে তত্র মহাসুরেন্দ্রে

সেন্দ্রাঃ সুরা বহ্নিপুরোগমাস্তাম্ ।

কাত্যায়নীং তুষ্টুবুরিষ্টলাভাদ্

বিকাশিবক্ত্রাব্জবিকাশিতাশাঃ ॥ ২॥

দেবি প্রপন্নার্তিহরে প্রসীদ

প্রসীদ মাতর্জগতোঽখিলস্য ।

প্রসীদ বিশ্বেশ্বরি পাহি বিশ্বং

ত্বমীশ্বরী দেবি চরাচরস্য ॥ ৩॥

আধারভূতা জগতস্ত্বমেকা

মহীস্বরূপেণ যতঃ স্থিতাসি ।

অপাং স্বরূপস্থিতয়া ত্বয়ৈত-

দাপ্যায়তে কৃৎস্নমলঙ্ঘ্যবীর্যে ॥ ৪॥

ত্বং বৈষ্ণবীশক্তিরনন্তবীর্যা

বিশ্বস্য বীজং পরমাসি মায়া ।

সম্মোহিতং দেবি সমস্তমেতত্

ত্বং বৈ প্রসন্না ভুবি মুক্তিহেতুঃ ॥ ৫॥

বিদ্যাঃ সমস্তাস্তব দেবি ভেদাঃ

স্ত্রিয়ঃ সমস্তাঃ সকলা জগৎসু ।

ত্বয়ৈকযা পূরিতমম্বযৈতত্

কা তে স্তুতিঃ স্তব্যপরাপরোক্তিঃ ॥ ৬॥

সর্বভূতা যদা দেবী ভুক্তিমুক্তিপ্রদাযিনী ।

ত্বং স্তুতা স্তুতযে কা বা ভবন্তু পরমোক্তযঃ ॥ ৭॥

সর্বস্য বুদ্ধিরূপেণ জনস্য হৃদি সংস্থিতে ।

স্বর্গাপবর্গদে দেবি নারাযণি নমোঽস্তু তে ॥ ৮॥

কলাকাষ্ঠাদিরূপেণ পরিণামপ্রদাযিনি ।

বিশ্বস্যোপরতৌ শক্তে নারাযণি নমোঽস্তু তে ॥ ৯॥

সর্বমঙ্গলমাঙ্গল্যে শিবে সর্বার্থসাধিকে ।

শরণ্যে ত্র্যম্বকে গৌরি নারাযণি নমোঽস্তু তে ॥ ১০॥

সৃষ্টিস্থিতিবিনাশানাং শক্তিভূতে সনাতনি ।

গুণাশ্রযে গুণমযে নারাযণি নমোঽস্তু তে ॥ ১১॥

শরণাগতদীনার্তপরিত্রাণপরাযণে ।

সর্বস্যার্তিহরে দেবি নারাযণি নমোঽস্তু তে ॥ ১২॥

হংসযুক্তবিমানস্থে ব্রহ্মাণীরূপধারিণি ।

কৌশাম্ভঃক্ষরিকে দেবি নারাযণি নমোঽস্তু তে ॥ ১৩॥

ত্রিশূলচন্দ্রাহিধরে মহাবৃষভবাহিনি ।

মাহেশ্বরীস্বরূপেণ নারাযণি নমোঽস্তুতে ॥ ১৪॥

মযূরকুক্কুটবৃতে মহাশক্তিধরেঽনঘে ।

কৌমারীরূপসংস্থানে নারাযণি নমোঽস্তু তে ॥ ১৫॥

শঙ্খচক্রগদাশার্ঙ্গগৃহীতপরমাযুধে ।

প্রসীদ বৈষ্ণবীরূপে নারাযণি নমোঽস্তু তে ॥ ১৬॥

গৃহীতোগ্রমহাচক্রে দংষ্ট্রোদ্ধৃতবসুন্ধরে ।

বরাহরূপিণি শিবে নারাযণি নমোঽস্তু তে ॥ ১৭॥

নৃসিংহরূপেণোগ্রেণ হন্তুং দৈত্যান্ কৃতোদ্যমে ।

ত্রৈলোক্যত্রাণসহিতে নারাযণি নমোঽস্তু তে ॥ ১৮॥

কিরীটিনি মহাবজ্রে সহস্রনযনোজ্জ্বলে ।

বৃত্রপ্রাণহরে চৈন্দ্রি নারাযণি নমোঽস্তু তে ॥ ১৯॥

শিবদূতীস্বরূপেণ হতদৈত্যমহাবলে ।

ঘোররূপে মহারাবে নারাযণি নমোঽস্তু তে ॥ ২০॥

দংষ্ট্রাকরালবদনে শিরোমালাবিভূষণে ।

চামুণ্ডে মুণ্ডমথনে নারাযণি নমোঽস্তু তে ॥ ২১॥

লক্ষ্মি লজ্জে মহাবিদ্যে শ্রদ্ধে পুষ্টি স্বধে ধ্রুবে ।

মহারাত্রি মহামাযে নারাযণি নমোঽস্তু তে ॥ ২২॥

মেধে সরস্বতি বরে ভূতি বাভ্রবি তামসি ।

নিযতে ত্বং প্রসীদেশে নারাযণি নমোঽস্তুতে ॥ ২৩॥

সর্বস্বরূপে সর্বেশে সর্বশক্তিসমন্বিতে ।

ভযেভ্যস্ত্রাহি নো দেবি দুর্গে দেবি নমোঽস্তু তে ॥ ২৪॥

এতত্তে বদনং সৌম্যং লোচনত্রযভূষিতম্ ।

পাতু নঃ সর্বভূতেভ্যঃ কাত্যাযনি নমোঽস্তু তে ॥ ২৫॥

জ্বালাকরালমত্যুগ্রমশেষাসুরসূদনম্ ।

ত্রিশূলং পাতু নো ভীতের্ভদ্রকালি নমোঽস্তু তে ॥ ২৬॥

হিনস্তি দৈত্যতেজাংসি স্বনেনাপূর্য যা জগত্ ।

সা ঘণ্টা পাতু নো দেবি পাপেভ্যো নঃ সুতানিব ॥ ২৭॥

অসুরাসৃগ্বসাপঙ্কচর্চিতস্তে করোজ্জ্বলঃ ।

শুভায খড্গো ভবতু চণ্ডিকে ত্বাং নতা বযম্ ॥ ২৮॥

রোগানশেষানপহংসি তুষ্টা

রুষ্টা তু কামান্ সকলানভীষ্টান্ ।

ত্বামাশ্রিতানাং ন বিপন্নরাণাং

ত্বামাশ্রিতা হ্যাশ্রযতাং প্রযান্তি ॥ ২৯॥

এতৎকৃতং যৎকদনং ত্বযাদ্য

ধর্মদ্বিষাং দেবি মহাসুরাণাম্ ।

রূপৈরনেকৈর্বহুধাত্মমূর্তিং

কৃত্বাম্বিকে তৎপ্রকরোতি কান্যা ॥ ৩০॥

বিদ্যাসু শাস্ত্রেষু বিবেকদীপে-

ষ্বাদ্যেষু বাক্যেষু চ কা ত্বদন্যা ।

মমত্বগর্তেঽতিমহান্ধকারে

বিভ্রামযত্যেতদতীব বিশ্বম্ ॥ ৩১॥

রক্ষাংসি যত্রোগ্রবিষাশ্চ নাগা

যত্রারযো দস্যুবলানি যত্র ।

দাবানলো যত্র তথাব্ধিমধ্যে

তত্র স্থিতা ত্বং পরিপাসি বিশ্বম্ ॥ ৩২॥

বিশ্বেশ্বরি ত্বং পরিপাসি বিশ্বং

বিশ্বাত্মিকা ধারযসীহ বিশ্বম্ ।

বিশ্বেশবন্দ্যা ভবতী ভবন্তি

বিশ্বাশ্রযা যে ত্বযি ভক্তিনম্রাঃ ॥ ৩৩॥

দেবি প্রসীদ পরিপালয নোঽরিভীতে-

র্নিত্যং যথাসুরবধাদধুনৈব সদ্যঃ ।

পাপানি সর্বজগতাং প্রশমং নযাশু

উৎপাতপাকজনিতাংশ্চ মহোপসর্গান্ ॥ ৩৪ ॥

প্রণতানাং প্রসীদ ত্বং দেবি বিশ্বার্তিহারিণি ।

ত্রৈলোক্যবাসিনামীড্যে লোকানাং বরদা ভব ॥ ৩৫॥

দেব্যুবাচ ॥ ৩৬॥

বরদাহং সুরগণা বরং যন্মনসেচ্ছথ ।

তং বৃণুধ্বং প্রযচ্ছামি জগতামুপকারকম্ ॥ ৩৭॥

দেবা ঊচুঃ ॥ ৩৮॥

সর্বাবাধাপ্রশমনং ত্রৈলোক্যস্যাখিলেশ্বরি ।

এবমেব ত্বযা কার্যমস্মদ্বৈরিবিনাশনম্ ॥ ৩৯॥

দেব্যুবাচ ॥ ৪০॥

বৈবস্বতেঽন্তরে প্রাপ্তে অষ্টাবিংশতিমে যুগে ।

শুম্ভো নিশুম্ভশ্চৈবান্যাবুৎপৎস্যেতে মহাসুরৌ ॥ ৪১॥

নন্দগোপগৃহে জাতা যশোদাগর্ভসম্ভবা ।

ততস্তৌ নাশযিষ্যামি বিন্ধ্যাচলনিবাসিনী ॥ ৪২॥

পুনরপ্যতিরৌদ্রেণ রূপেণ পৃথিবীতলে ।

অবতীর্য হনিষ্যামি বৈপ্রচিত্তাংশ্চ দানবান্ ॥ ৪৩॥

ভক্ষযন্ত্যাশ্চ তানুগ্রান্ বৈপ্রচিত্তান্ মহাসুরান্ ।

রক্তা দন্তা ভবিষ্যন্তি দাডিমীকুসুমোপমাঃ ॥ ৪৪॥

ততো মাং দেবতাঃ স্বর্গে মর্ত্যলোকে চ মানবাঃ ।

স্তুবন্তো ব্যাহরিষ্যন্তি সততং রক্তদন্তিকাম্ ॥ ৪৫॥

ভূযশ্চ শতবার্ষিক্যামনাবৃষ্ট্যামনম্ভসি ।

মুনিভিঃ সংস্মৃতা ভূমৌ সম্ভবিষ্যাম্যযোনিজা ॥ ৪৬॥

ততঃ শতেন নেত্রাণাং নিরীক্ষিষ্যাম্যহং মুনীন্ ।

কীর্তযিষ্যন্তি মনুজাঃ শতাক্ষীমিতি মাং ততঃ ॥ ৪৭॥

ততোঽহমখিলং লোকমাত্মদেহসমুদ্ভবৈঃ ।

ভরিষ্যামি সুরাঃ শাকৈরাবৃষ্টেঃ প্রাণধারকৈঃ ॥ ৪৮॥

শাকম্ভরীতি বিখ্যাতিং তদা যাস্যাম্যহং ভুবি ।

তত্রৈব চ বধিষ্যামি দুর্গমাখ্যং মহাসুরম্ ॥ ৪৯॥

দুর্গাদেবীতি বিখ্যাতং তন্মে নাম ভবিষ্যতি ।

পুনশ্চাহং যদা ভীমং রূপং কৃত্বা হিমাচলে ॥ ৫০॥

রক্ষাংসি ভক্ষযিষ্যামি মুনীনাং ত্রাণকারণাত্ ।

তদা মাং মুনযঃ সর্বে স্তোষ্যন্ত্যানম্রমূর্তযঃ ॥ ৫১॥

ভীমাদেবীতি বিখ্যাতং তন্মে নাম ভবিষ্যতি ।

যদারুণাখ্যস্ত্রৈলোক্যে মহাবাধাং করিষ্যতি ॥ ৫২॥

তদাহং ভ্রামরং রূপং কৃত্বাসংখ্যেযষট্পদম্ ।

ত্রৈলোক্যস্য হিতার্থায বধিষ্যামি মহাসুরম্ ॥ ৫৩॥

ভ্রামরীতি চ মাং লোকাস্তদা স্তোষ্যন্তি সর্বতঃ ।

ইত্থং যদা যদা বাধা দানবোত্থা ভবিষ্যতি ॥ ৫৪॥

তদা তদাবতীর্যাহং করিষ্যাম্যরিসংক্ষযম্ ॥ ৫৫॥

॥ স্বস্তি শ্রীমার্কণ্ডেযপুরাণে সাবর্ণিকে মন্বন্তরে দেবীমাহাত্ম্যে

নারাযণীস্তুতির্নামৈকাদশোঽধ্যাযঃ ॥ ১১॥

॥ দ্বাদশোঽধ্যাযঃ ॥

ওঁ দেব্যুবাচ ॥ ১॥

এভিঃ স্তবৈশ্চ মাং নিত্যং স্তোষ্যতে যঃ সমাহিতঃ।

তস্যাহং সকলাং বাধাং শমযিষ্যাম্যসংশযম্ ॥ ২॥

মধুকৈটভনাশং চ মহিষাসুরঘাতনম্।

কীর্তযিষ্যন্তি যে তদ্বদ্বধং শুম্ভনিশুম্ভযোঃ ॥ ৩॥

অষ্টম্যাং চ চতুর্দশ্যাং নবম্যাং চৈকচেতসঃ।

শ্রোষ্যন্তি চৈব যে ভক্ত্যা মম মাহাত্ম্যমুত্তমম্ ॥ ৪॥

ন তেষাং দুষ্কৃতং কিঞ্চিদ্দুষ্কৃতোত্থা ন চাপদঃ।

ভবিষ্যতি ন দারিদ্র্যং ন চৈবেষ্টবিযোজনম্ ॥ ৫॥

শত্রুভ্যো ন ভযং তস্য দস্যুতো বা ন রাজতঃ।

ন শস্ত্রানলতোযৌঘাত্ কদাচিত্ সম্ভবিষ্যতি ॥ ৬॥

তস্মান্মমৈতন্মাহাত্ম্যং পঠিতব্যং সমাহিতৈঃ ।

শ্রোতব্যং চ সদা ভক্ত্যা পরং স্বস্ত্যয়নং মহত্ ॥ ৭॥

উপসর্গানশেষাংস্তু মহামারীসমুদ্ভবান্ ।

তথা ত্রিবিধমুৎপাতং মাহাত্ম্যং শময়েন্মম ॥ ৮॥

যত্রৈতৎপঠ্যতে সম্যঙ্নিত্যমায়তনে মম ।

সদা ন তদ্বিমোক্ষ্যামি সাংনিধ্যং তত্র মে স্থিতম্ ॥ ৯॥

বলিপ্রদানে পূজায়ামগ্নিকার্যে মহোৎসবে ।

সর্বং মমৈতন্মাহাত্ম্যম্ উচ্চার্যং শ্রাব্যমেব চ ॥ ১০॥

জানতাজানতা বাপি বলিপূজাং যথা কৃতাম্ ।

প্রতীক্ষিষ্যাম্যহং প্রীত্যা বহ্নিহোমং তথাকৃতম্ ॥ ১১॥

শরৎকালে মহাপূজা ক্রিয়তে যা চ বার্ষিকী ।

তস্যাং মমৈতন্মাহাত্ম্যং শ্রুত্বা ভক্তিসমন্বিতঃ ॥ ১২॥

সর্বাবাধাবিনির্মুক্তো ধনধান্যসমন্বিতঃ ।

মনুষ্যো মৎপ্রসাদেন ভবিষ্যতি ন সংশয়ঃ ॥ ১৩॥

শ্রুত্বা মমৈতন্মাহাত্ম্যং তথা চোৎপত্তয়ঃ শুভাঃ ।

পরাক্রমং চ যুদ্ধেষু জায়তে নির্ভয়ঃ পুমান্ ॥ ১৪॥

রিপবঃ সংক্ষয়ং যান্তি কল্যাণং চোপপদ্যতে ।

নন্দতে চ কুলং পুংসাং মাহাত্ম্যং মম শৃণ্বতাম্ ॥ ১৫॥

শান্তিকর্মণি সর্বত্র তথা দুঃস্বপ্নদর্শনে ।

গ্রহপীডাসু চোগ্রাসু মাহাত্ম্যং শৃণুযান্মম ॥ ১৬॥

উপসর্গাঃ শমং যান্তি গ্রহপীডাশ্চ দারুণাঃ ।

দুঃস্বপ্নং চ নৃভির্দৃষ্টং সুস্বপ্নমুপজায়তে ॥ ১৭॥

বালগ্রহাভিভূতানাং বালানাং শান্তিকারকম্ ।

সংঘাতভেদে চ নৃণাং মৈত্রীকরণমুত্তমম্ ॥ ১৮॥

দুর্বৃত্তানামশেষাণাং বলহানিকরং পরম্ ।

রক্ষোভূতপিশাচানাং পঠনাদেব নাশনম্ ॥ ১৯॥

সর্বং মমৈতন্মাহাত্ম্যং মম সন্নিধিকারকম্ ।

পশুপুষ্পার্ঘ্যধূপৈশ্চ গন্ধদীপৈস্তথোত্তমৈঃ ॥ ২০॥

বিপ্রাণাং ভোজনৈর্হোমৈঃ প্রোক্ষণীযৈরহর্নিশম্ ।

অন্যৈশ্চ বিবিধৈর্ভোগৈঃ প্রদানৈর্বৎসরেণ যা ॥ ২১॥

প্রীতির্মে ক্রিয়তে সাস্মিন্ সকৃদুচ্চরিতে শ্রুতে ।
শ্রুতং হরতি পাপানি তথারোগ্যং প্রযচ্ছতি ॥ ২২॥

রক্ষাং করোতি ভূতেভ্যো জন্মনাং কীর্তনং মম ।
যুদ্ধেষু চরিতং যন্মে দুষ্টদৈত্যনিবর্হণম্ ॥ ২৩॥

তস্মিঞ্শ্রুতে বৈরিকৃতং ভযং পুংসাং ন জাযতে ।
যুষ্মাভিঃ স্তুতযো যাশ্চ যাশ্চ ব্রহ্মর্ষিভিঃ কৃতাঃ ॥ ২৪॥

ব্রহ্মণা চ কৃতাস্তাস্তু প্রযচ্ছন্তু শুভাং মতিম্ ।
অরণ্যে প্রান্তরে বাপি দাবাগ্নিপরিবারিতঃ ॥ ২৫॥

দস্যুভির্বা বৃতঃ শূন্যে গৃহীতো বাপি শত্রুভিঃ ।
সিংহব্যাঘ্রানুযাতো বা বনে বা বনহস্তিভিঃ ॥ ২৬॥

রাজ্ঞা ক্রুদ্ধেন চাজ্ঞপ্তো বধ্যো বন্ধগতোঽপি বা ।
আঘূর্ণিতো বা বাতেন স্থিতঃ পোতে মহার্ণবে ॥ ২৭॥

পতৎসু চাপি শস্ত্রেষু সংগ্রামে ভৃশদারুণে ।
সর্বাবাধাসু ঘোরাসু বেদনাভ্যর্দিতোঽপি বা ॥ ২৮॥

স্মরন্ মমৈতচ্চরিতং নরো মুচ্যেত সঙ্কটাত্ ।

মম প্রভাবাৎসিংহাদ্যা দস্যবো বৈরিণস্তথা ॥ ২৯॥

দূরাদেব পলায়ন্তে স্মরতশ্চরিতং মম ॥ ৩০॥

ঋষিরুবাচ ॥ ৩১॥

ইত্যুক্ত্বা সা ভগবতী চণ্ডিকা চণ্ডবিক্রমা ॥ ৩২॥

পশ্যতাং সর্বদেবানাং তত্রৈবান্তরধীযত ।

তেঽপি দেবা নিরাতঙ্কাঃ স্বাধিকারান্যথা পুরা ॥ ৩৩॥

যজ্ঞভাগভুজঃ সর্বে চক্রুর্বিনিহতারযঃ ।

দৈত্যাশ্চ দেব্যা নিহতে শুম্ভে দেবরিপৌ যুধি ॥ ৩৪॥

জগদ্বিধ্বংসকে তস্মিন্ মহোগ্রেঽতুলবিক্রমে ।

নিশুম্ভে চ মহাবীর্যে শেষাঃ পাতালমাযযুঃ ॥ ৩৫॥

এবং ভগবতী দেবী সা নিত্যাপি পুনঃ পুনঃ ।

সম্ভূয কুরুতে ভূপ জগতঃ পরিপালনম্ ॥ ৩৬॥

তযৈতন্মোহ্যতে বিশ্বং সৈব বিশ্বং প্রসূযতে ।

সা যাচিতা চ বিজ্ঞানং তুষ্টা ঋদ্ধিং প্রযচ্ছতি ॥ ৩৭॥

ব্যাপ্তং তযৈতৎসকলং ব্রহ্মাণ্ডং মনুজেশ্বর ।

মহাদেব্যা মহাকালী মহামারীস্বরূপযা ॥ ৩৮॥

সৈব কালে মহামারী সৈব সৃষ্টির্ভবত্যজা ।

স্থিতিং করোতি ভূতানাং সৈব কালে সনাতনী ॥ ৩৯॥

ভবকালে নৃণাং সৈব লক্ষ্মীর্বৃদ্ধিপ্রদা গৃহে ।

সৈবাভাবে তথালক্ষ্মীর্বিনাশাযোপজাযতে ॥ ৪০॥

স্তুতা সম্পূজিতা পুষ্পৈর্গন্ধধূপাদিভিস্তথা ।

দদাতি বিত্তং পুত্রাংশ্চ মতিং ধর্মে গতিং শুভাম্ ॥ ৪১॥

॥ স্বস্তি শ্রীমার্কণ্ডেযপুরাণে সাবর্ণিকে মন্বন্তরে দেবীমাহাত্ম্যে

ভগবতী বাক্যং দ্বাদশোঽধ্যাযঃ ॥ ১২॥

॥ ত্রযোদশোঽধ্যাযঃ ॥

ওঁ ঋষিরুবাচ ॥ ১॥

এতত্তে কথিতং ভূপ দেবীমাহাত্ম্যমুত্তমম্ ।

এবংপ্রভাবা সা দেবী যযেদং ধার্যতে জগত্ ॥ ২॥

বিদ্যা তথৈব ক্রিযতে ভগবদ্বিষ্ণুমাযযা ।

তযা ত্বমেষ বৈশ্যশ্চ তথৈবান্যে বিবেকিনঃ ॥ ৩॥

মোহ্যন্তে মোহিতাশ্চৈব মোহমেষ্যন্তি চাপরে ।

তামুপৈহি মহারাজ শরণং পরমেশ্বরীম্ ॥ ৪ ॥

আরাধিতা সৈব নৃণাং ভোগস্বর্গাপবর্গদা ॥ ৫ ॥

মার্কণ্ডেয উবাচ ॥ ৬॥

ইতি তস্য বচঃ শ্রুত্বা সুরথঃ স নরাধিপঃ ॥ ৭॥

প্রণিপত্য মহাভাগং তমৃষিং সংশিতব্রতম্ ।

নির্বিণ্ণোঽতিমমত্বেন রাজ্যাপহরণেন চ ॥ ৮॥

জগাম সদ্যস্তপসে স চ বৈশ্যো মহামুনে ।

সংদর্শনার্থমম্বাযা নদীপুলিনমাস্থিতঃ ॥ ৯॥

স চ বৈশ্যস্তপস্তেপে দেবীসূক্তং পরং জপন্ ।

তৌ তস্মিন্ পুলিনে দেব্যাঃ কৃত্বা মূর্তিং মহীমযীম্ ॥ ১০॥

অর্হণাং চক্রতুস্তস্যাঃ পুষ্পধূপাগ্নিতর্পণৈঃ ।

নিরাহারৌ যতাত্মানৌ তন্মনস্কৌ সমাহিতৌ ॥ ১১॥

দদতুস্তৌ বলিং চৈব নিজগাত্রাসৃগুক্ষিতম্ ।

এবং সমারাধযতোস্ত্রিভির্বর্ষৈর্যতাত্মনোঃ ॥ ১২॥

পরিতুষ্টা জগদ্ধাত্রী প্রত্যক্ষং প্রাহ চণ্ডিকা ॥ ১৩॥

দেব্যুবাচ ॥ ১৪॥

যৎপ্রার্থ্যতে ত্বযা ভূপ ত্বযা চ কুলনন্দন ।

মত্তস্তৎপ্রাপ্যতাং সর্বং পরিতুষ্টা দদামিতে ॥ ১৫॥

মার্কণ্ডেয উবাচ ॥ ১৬॥

ততো বব্রে নৃপো রাজ্যমবিভ্রংশ্যন্যজন্মনি ।

অত্রৈব চ নিজং রাজ্যং হতশত্রুবলং বলাত্ ॥ ১৭॥

সোঽপি বৈশ্যস্ততো জ্ঞানং বব্রে নির্বিণ্ণমানসঃ ।

মমেত্যহমিতি প্রাজ্ঞঃ সঙ্গবিচ্যুতিকারকম্ ॥ ১৮॥

দেব্যুবাচ ॥ ১৯॥

স্বল্পৈরহোভির্নৃপতে স্বং রাজ্যং প্রাপ্স্যতে ভবান্ ॥ ২০॥

হত্বা রিপূনস্খলিতং তব তত্র ভবিষ্যতি ॥ ২১॥

মৃতশ্চ ভূযঃ সম্প্রাপ্য জন্ম দেবাদ্বিবস্বতঃ ॥ ২২॥

সাবর্ণিকো মনুর্নাম ভবান্ভুবি ভবিষ্যতি ॥ ২৩॥

বৈশ্যবর্য ত্বযা যশ্চ বরোঽস্মত্তোঽভিবাঞ্ছিতঃ ॥ ২৪॥

তং প্রযচ্ছামি সংসিদ্ধ্যৈ তব জ্ঞানং ভবিষ্যতি ॥ ২৫॥

মার্কণ্ডেয উবাচ ॥ ২৬॥

ইতি দত্ত্বা তযোর্দেবী যথাভিলষিতং বরম্ ।

বভূবান্তর্হিতা সদ্যো ভক্ত্যা তাভ্যামভিষ্টুতা ॥ ২৭॥

এবং দেব্যা বরং লব্ধ্বা সুরথঃ ক্ষত্রিযর্ষভঃ ।

সূর্যাজ্জন্ম সমাসাদ্য সাবর্ণির্ভবিতা মনুঃ ॥ ২৮॥

ইতি দত্ত্বা তযোর্দেবী যথাভিলষিতং বরম্ ।

বভূবান্তর্হিতা সদ্যো ভক্ত্যা তাভ্যামভিষ্টুতা ॥

এবং দেব্যা বরং লব্ধ্বা সুরথঃ ক্ষত্রিয়র্ষভঃ ।

সূর্যাজ্জন্ম সমাসাদ্য সাবর্ণির্ভবিতা মনুঃ ॥ ক্লীং ওঁ ॥

॥ স্বস্তি শ্রীমার্কণ্ডেযপুরাণে সাবর্ণিকে মন্বন্তরে দেবীমাহাত্ম্যে

সুরথবৈশ্যযোর্বরপ্রদানং নাম ত্রয়োদশোঽধ্যাযঃ ॥ ১৩॥

॥ শ্রীসপ্তশতীদেবীমাহাত্ম্যং সমাপ্তম্ ॥

॥ ওঁ তত্ সত্ ওঁ ॥

॥ অথ অপরাধক্ষমাপণস্তোত্রম্ ॥

ওঁ অপরাধশতং কৃত্বা জগদম্বেতি চোচ্চরেত্ ।

যাং গতিং সমবাপ্নোতি ন তাং ব্রহ্মাদযঃ সুরাঃ ॥ ১॥

সাপরাধোঽস্মি শরণং প্রাপ্তস্ত্বাং জগদম্বিকে ।

ইদানীমনুকম্প্যোঽহং যথেচ্ছসি তথা কুরু ॥ ২॥

অজ্ঞানাদ্বিস্মৃতের্ভ্রান্ত্যা যন্ন্যূনমধিকং কৃতম্ ।

তৎসর্বং ক্ষম্যতাং দেবি প্রসীদ পরমেশ্বরি ॥ ৩॥

কামেশ্বরি জগন্মাতঃ সচ্চিদানন্দবিগ্রহে ।

গৃহাণার্চামিমাং প্রীত্যা প্রসীদ পরমেশ্বরি ॥ ৪॥

সর্বরূপময়ী দেবী সর্বং দেবীময়ং জগত্ ।

অতোঽহং বিশ্বরূপাং ত্বাং নমামি পরমেশ্বরীম্ ॥ ৫॥

যদক্ষরং পরিভ্রষ্টং মাত্রাহীনঞ্চ যদ্ভবেত্ ।

পূর্ণং ভবতু তত্ সর্বং ত্বৎপ্রসাদান্মহেশ্বরি ॥ ৬॥

যদত্র পাঠে জগদম্বিকে ময়া

বিসর্গবিন্দ্বক্ষরহীনমীরিতম্ ।

তদস্তু সম্পূর্ণতমং প্রসাদতঃ

সঙ্কল্পসিদ্ধিশ্চ সদৈব জায়তাম্ ॥ ৭॥

যন্মাত্রাবিন্দুবিন্দুদ্বিতয়পদপদদ্বন্দ্ববর্ণাদিহীনং

ভক্ত্যাভক্ত্যানুপূর্বং প্রসভকৃতিবশাত্ ব্যক্তমব্যক্তমম্ব ।

মোহাদজ্ঞানতো বা পঠিতমপঠিতং সাম্প্রতং তে স্তবেঽস্মিন্

তত্ সর্বং সাঙ্গমাস্তাং ভগবতি বরদে ত্বৎপ্রসাদাত্ প্রসীদ ॥ ৮॥

প্রসীদ ভগবত্যম্ব প্রসীদ ভক্তবৎসলে ।

প্রসাদং কুরু মে দেবি দুর্গে দেবি নমোঽস্তু তে ॥ ৯॥

॥ ইতি অপরাধক্ষমাপণস্তোত্রং সমাপ্তম্ ॥

॥ অথ দেবীসূক্তম্ ॥

ওঁ অহং রুদ্রেভির্বসুভিশ্চরাম্যহ-

মাদিত্যৈরুত বিশ্বদেবৈঃ ।

অহং মিত্রাবরুণোভা বিভর্ম্যহ-

মিন্দ্রাগ্নী অহমশ্বিনোভা ॥ ১॥

অহং সোমমাহনসং বিভর্ম্যহং

ত্বষ্টারমুত পূষণং ভগম্ ।

অহং দধামি দ্রবিণং হবিষ্মতে

সুপ্রাব্যে যজমানায় সুন্বতে ॥ ২॥

অহং রাষ্ট্রী সঙ্গমনী বসূনাং

চিকিতুষী প্রথমা যজ্ঞিয়ানাম্ ।

তাং ভা দেবা ব্যদধুঃ পুরুত্রা

ভূরিস্থাত্রাং ভূর্যাবেশযন্তীম্ ॥ ৩॥

ময়া সো অন্নমত্তি যো বিপশ্যতি

যঃ প্রাণিতি য ঈং শৃণোত্যুক্তম্ ।

অমন্তবো মাং ত উপক্ষিযন্তি

শ্রুধি শ্রুত শ্রদ্ধিবং তে বদামি ॥ ৪॥

অহমেব স্বযমিদং বদামি জুষ্টং

দেবেভিরুত মানুষেভিঃ ।

যং কামযে তং তমুগ্রং কৃণোমি

তং ব্রহ্মাণং তমৃষিং তং সুমেধাম্ ॥ ৫॥

অহং রুদ্রায ধনুরা তনোমি

ব্রহ্মদ্বিষে শরবে হন্তবা উ ।

অহং জনায সমদং কৃণোম্যহং

দ্যাবাপৃথিবী আ বিবেশ ॥ ৬॥

অহং সুবে পিতরমস্য মূর্ধন্

মম যোনিরপ্স্বন্তঃ সমুদ্রে ।

ততো বি তিষ্ঠে ভুবনানু বিশ্বো-

তামূং দ্যাং বর্ষ্মণোপ স্পৃশামি ॥ ৭॥

অহমেব বাত ইব প্র বাম্যা-

রভমাণা ভুবনানি বিশ্বা ।

পরো দিবা পর এনা পৃথিব্যৈ-

তাবতী মহিনা সং বভূব ॥ ৮॥

॥ ইতি ঋগ্বেদোক্তং দেবীসূক্তং সমাপ্তম্ ॥

॥ ওঁ তত্ সত্ ওঁ ॥

Encoded by Smt. K. Shankaran and

reencoded by Kirk Wortman kirkwort@hotmail.com

Proofread by Sunder Hattangadi sunderh@hotmail.com

and Kirk Wortman kirkwort@hotmail.com

% A note from Kirk Wortman

% This text should be 100% accurate now. I proofread it 3 times.

% And one of those proofreads used a method which, although time-consuming, is

% almost infallible: I actually encoded all 700 shlokas myself and then used

% a comparison function in MS-Excel to compare my ITRANS with the original

% ITRANS (after conforming the codes to each other, e.g. making all "A"s into

% "A"s), line by line. The only mistakes this method would miss were those

% which both the original encoder and myself made - an occurrence which is

% extremely unlikely.

%

% I will also be posting this to Dale's website as soon as I get the time to

% format it.

%

% Here were my sources for the 700 main shlokas that I proofread:

%

% 1) 2 recordings of Vedic Pandits chanting the entire Devi Mahatmyam,

% recorded from the Maharishi Channel, one from October 1999 and the other

% from April 2002 (they always broadcast this during the fall and spring

% Navaratris, each day of the Navaratri) - there were 2 pandits chanting

% together on each tape

%

% 2) Shri Durga Saptashati, published by Gita Press, Gorakhpur

%

% 3) Devi Mahatmyam (Glory of the Divine Mother), Sri Ramakrishna Math,

% Madras, with English translation, first published 1953

%

%

% These sources were 99.9% identical with each other. Where there were

% differences, I resolved those differences in favor of the pandit recordings

% in most cases. In a few cases, I resolved them in favor of the Gita Press

% book. The pandit recordings were absolutely mistake-free, which is not

% surprising, since these pandits probably chant this text every day and since

% they probably chant it mostly from memory. So, it was clear to me that the

% recordings were the most authoritative source out of the 3 sources I used.

% And it was clear that the Gita Press book was more authoritative than the

% Ramakrishna Math book; the latter had many more typos and unclear print

than

% the former.

%

% The original encoder obviously used the Ramakrishna Math book as his/her source.

% This was clear not only from the fact that there were no differences

% between his ITRANS and book, but also from the fact that a substantial

% number of his mistakes were due to typos and unclear print that existed in

% the book itself.

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Devi Mahatmyam ( Durga Saptashati ) Lyrics in Bengali PDF
% File name : durga700.itx
% Location : doc_devii
% Language : Sanskrit
% Subject : religious
% Transliterated by : K. Shankaran Kirk Wortman Dhruba Chakroborty Ahto Jarve
% Proofread by : Sunder Hattangadi sunderh at hotmail.com : Kirk Wortman (kirkwort at hotmail.com)
% Description-comments : 700 shlokas regarding devi durga
% Latest update : September 14, 2003, July 4, 2008
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.

PDF file is generated [ December 15, 2015 ] at Stotram Website